   अस्मिन् सत्रे विद्यार्थिनः पठितविषयस्य अभ्यासम् अकार्षुः , वाक्यार्थविचारे रम्या इति नामधेया बालिका कृत्तद्धितसमासाश्च इत्यस्य प्रौढमनोरमानुसारेण समासकृतनियमपर्यन्तं वाक्यार्थम् अकरोत् ।
7. **क्रीडाकालांशः –** छात्रैः क्रीडितम् । क्रीडाकालांशे छात्राः शारीरिकीः क्रीडा अकुर्वन् ।
8. **रात्रिसत्रम् –**
   सत्रेऽस्मिन् कश्चन नूतनः प्रयोगः कृतः, प्रयोगेऽस्मिन् छात्राः कानिचन लिखितगीतानि फलके अपश्यन् अपि च तानि अश्रृण्वन् लिखितेषु गीतेषु कुत्र दोषाः सन्ति तेषाम् अन्वेषणं गीतं श्रुत्वा क्रियेत ,अनेन माध्यमेन छात्राणां कौशलविकासो जायते । शङ्कराचार्याणां भाषणं संश्राव्य तस्मात् तिङन्तपदानि चित्वा तेषां विवरणं क्रियेत । एतादृशः नूतनः प्रयोगः कौशलविकासाय अक्रियत । छात्राः अत्यन्तम् समुत्साहेन भागम् अगृह्णन् । व्याकरणशास्त्रज्ञानेन सह विद्यार्थिनां कौशलं वर्धेत तदर्थं नूतनप्रयोगाः समपेक्षन्ते, अतः तादृशाः क्रियाः क्रियन्त इति । रात्रौ पादोनदशवादने कल्याणमन्त्रेण सत्रमिदं समाप्तिम् अगात् ।

# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

















## अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

**षष्ठं दिनम् ( 25-05-24, शनिवासरः)**

1. **योगकक्षा-**

   योगशिक्षकः डॉ.नवनीतः योगासनानि प्राणायामाञ्च अकारयत् , योगासनसकक्षायां छात्रैः आसनानाम् अभ्यासः कृतः, छात्राः ध्यानविधेः अभ्यासम् अकुर्वन् अथ च अन्ते प्रार्थनाम् अकुर्वन् ।

2. **पारायणकक्षा –**

   प्रौढमनोरमायाः पारायणं वृन्दावने अधीयानो विद्यार्थी सरूपाणामेकशेष एकविभक्तौ सूत्रस्य व्याख्यानपर्यन्तं पारायणम् अकारयत्। अष्टाध्यायीपारायणं छात्री वेदश्रीविवेककुलकर्णी चतुर्थाध्यायस्य द्वयोः अध्याययोः पारायणम् अकारयत्।

3. **प्रथमाकक्षा –**

   आचार्याः बिल्वेशशर्माणः शब्दरत्ने बहुगोमत्क इति रूपविषये ङ्याप्ग्रहणकृतनियमः कथं प्रवर्तते इत्यशम् शब्दरत्नानुसारं मनोरमामूलेन सह अबोधयन्।

4. **सङ्गणककक्षा-**

   अस्यां कक्षायां श्रीमान् दीपकवर्ममहोदयः Basic of computer system, Hardware and software parts, Basic applications And their usages, इत्यादीन् सङ्गणकसम्बद्धान् विषयान् अबोधयत् ।

5. **द्वितीया कक्षा –**

   आचार्याः बिल्वेशशर्माणः शब्दरत्ने राजकुमारी इत्यत्र अप्राप्तप्रातिपदिकसंज्ञायाः वस्तुतः समाधानं किमित्यस्य विषये तथैव समासकृतनियमस्य शरीरं किं भवेत् इति च विचारमुपस्थापितवन्तः। आचार्याः बिल्वेशशर्माणः अत्यन्तं सरलविधिना शास्त्रम् अध्यापितवन्तः । शब्दरत्नम् अधिकृत्य आचार्यैः पाठनं विहितम् इति ।

6. **अभ्यासकक्षा जिज्ञासासमाधानञ्च –**

   आचार्याः बिल्वेशशर्माणः छात्राणां जिज्ञासाः समधुः, शास्त्राध्ययनं कथं क्रियेत इति इमान् विषयान् आधृत्य आचार्यैः विद्यार्थिनः प्रचोदिताः , शास्त्रं नित्यं पठनीयम् इति आचार्याणाम् अभिमतमासीत्। आचार्यबिल्वेशशर्मणां पाठः 23 दिनाङ्कतः 25 दिनाङ्कं यावत् प्राचलत् । आचार्यैः महत्या निष्ठया पाठितम् । पाठात्परं आचार्यबिल्वेशशर्मभिः सह छात्राणां सामूहिकं चित्रमभूत् । रात्रिसत्रे विद्यार्थिभिः अधीतविषयस्य स्वाध्यायः कृतः, प्रौढमनोरमापाठस्य आवृत्तिः छात्रैः अक्रियत ।

# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्















# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

**सप्तमं दिनम्** ( 26-05-24, **रविवासरः**)

1. **योगकक्षा-**

   प्रशिक्षणवर्गस्य दिनचर्यानुसारं प्रातः षड्वादने योगासनकक्षा समजायत, योगशिक्षकः छात्राणां स्वास्थ्यदृष्ट्या योगासनानि प्राणायामाञ्च अकारयत्, योगासनस्य कक्षायां छात्रैः आसनानि कृतानि। ताडासनम्, सर्वाङ्गासनम्, वृक्षासनम्, इत्यादीनि आसनानि छात्रैः अभ्यसितानि ।

2. **पारायणकक्षा-**

   गुरुकुलीया छात्रा जिज्ञासा अष्टाध्याय्याः चतुर्थस्य पादस्य तृतीयचतुर्थाध्याययोः पारायणम् अकारयत्। लोकेशचन्द्रबडसिलियाछात्रेण प्रौढमनोरमायाम् अमिपूर्वः सूत्रात् न बहुव्रीहौसूत्रपर्यन्तं पारायणं कारितम्।

3. **शास्त्रकक्षा- (प्रथमा)**

   केन्द्रीयसंस्कृतविश्वविद्यालयस्य जम्मूपरिसरस्य निदेशकाः आचार्याः श्रीधरमिश्रमहोदयाः सरूपाणामेकशेष एकविभक्तौ सूत्रे आदितः द्वन्द्वपदानुवृत्ते 'द्वन्द्वे कृते सति' कः दोषः इति पर्यन्तम् अबूबुधन्। कक्षायाः पूर्वं वर्गसंयोजकाः आचार्याणां सत्कारम् अकार्षुः ।

4. **शास्त्रकक्षा जिज्ञासासमाधानम् –**

   आचार्याः श्रीधरमिश्राः प्रौढमनोरमायां सरूपाणामेकशेष एकविभक्तौ सूत्रे पाठिते विषये छात्राणां शङ्काः न्यवीवरन्, यथा सहविवक्षा इतिविषयः, करौ इतिरूपसाधनविषयः,उपलक्षणस्य विषयः इत्यादयः। छात्राः नैकाः जिज्ञासाः अकार्षुः, आचार्यैः सर्वजिज्ञासाः समदधुः। रविवासरे शास्त्राध्ययनकक्षा मध्याह्न-1.30 वादनं यावत् कक्षा प्रावर्तिष्ट । अस्मिन् दिने अर्धदिनात्मकम् अभ्यासाय विरामः प्रादायि ।






# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

**अष्टमं दिनम्** ( 27-05-24, **सोमवासरः**)

1. **योगकक्षा-**

   प्रशिक्षणवर्गस्य दिनचर्यानुसारं प्रातः षड्वादने योगासनकक्षा समजायत, योगशिक्षकः छात्राणां स्वास्थ्यदृष्ट्या योगासनानि प्राणायामाञ्च अकारयत् , योगासनस्य कक्षायां छात्रैः आसनानि कृतानि । ताडासनम्, सर्वाङ्गासनम्, वृक्षासनम्, इत्यादीनि आसनानि छात्रैः अभ्यसितानि, अथ च छात्रैः जलनैति इति विधेरभ्यासः कृतः। सर्वे छात्राः प्राणायामान् अकुर्वन् ।

2. **पारायणकक्षा-**

   पारायणकक्षायां छात्रेण राघवशर्मणा प्रौढमनोरमायाः पारायणं न बहुव्रीहौ सूत्रात् हाहा पदस्य व्याख्यानपर्यन्तं पारायणं कारितम्, सर्वे छात्राः उत्साहेन पारायणम् अकुर्वन् ।

3. **विशिष्टं व्याख्यानम् –**

   केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊपरिसरस्य व्याकरणविद्याशाखायाः समन्वयकाः आचार्याः भारतभूषणत्रिपाठिमहाशयाः प्रत्याहारो नाम किम्, आदिरन्त्येनसहेता सूत्रस्य परिष्कृतः अर्थः कः, तथैव रप्रत्याहारस्य च विषये विशेषव्याख्यानमकुर्वन्। रप्रत्याहारस्य खण्डनमण्डनपूर्वकं व्याख्यानम् अकार्षुः । आचार्याणां वर्गसंयोजकैः स्वागतम् अकारि इति ।

4. **शास्त्रकक्षा (प्रथमा) –**

   आचार्याः श्रीधरमिश्राः सरूपाणामेकशेष एकविभक्तौ सूत्रस्थे शब्दरत्ने कथं मातृशब्दयोर्जननीवाचिपरिच्छेत्तृवाचिनोर्नैकशेषः, प्रातिपदिकैकशेषे मातर्ममाग्रतः प्रतिषेधो वक्तव्यं इति वार्तिकविषये च तथा च एकशेषः इतरेतरद्वन्द्वस्यैव विषयः इत्यादीन् विषयान् प्रौढमनोरमानुसारम् अबोधयन् इति ।

5. **शास्त्रकक्षा (द्वितीया) -**

   आचार्याः श्रीधरमिश्राः प्रौढमनोरमायां सरूपाणामेकशेष एकविभक्तौ सूत्रे प्राचां व्याख्याने को दोषः इत्युक्ते एकविभक्तौ इत्यस्य आवृत्तौ प्रमाणाभावात् तथापि कृते अतिव्याप्तिः दर्शिता। तथैव भैक्षमीत्यादिषु रूपसिद्धिषु एकशैषस्याभावं दर्शितं भागमपाठयन्। आचार्यैः प्रौढमनोरमादृष्ट्या, शब्दरत्नदृष्ट्या च विस्तृतं व्याख्यानम् अकारि ।

6. **शास्त्रचर्चा जिज्ञासासमाधानञ्च –**

   आचार्याः विष्णुकान्तमहोदयाः प्रौढमनोरमायां सुप्प्रत्याहारे घटितानां प्रत्ययानां विषये तेषु इत्करणं विशेषणार्थः। तथैव तेषां अन्यानि प्रयोजनानि कानीति समाहितं ग्रन्थभागमपाठयन्। आचार्यैः अवशिष्टो भाग अपि अध्यापितः तस्मिन् भागे आगताः शङ्काः अपि शान्तीकृताः इति । स्वाध्यायकालांशे छात्राः अधीतविषयस्य विद्यार्थिनः अभ्यासम् अकुर्वन् । छात्रैः विषयाणाम् उपस्थापनं सम्यक्प्रकारेण क्रियत इति ।

# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

















# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

**नवमं दिनम्** ( 28-05-24, **मङ्गलवासरः**)

1. **योगकक्षा-** डॉ.नवनीतमहोदयः योगसनानि अकारयत् । सर्वे योगाभ्यासम् अकुर्वन्, शिक्षकः पूर्वं कृतानाम् आसनानाम् अभ्यासम् अकारायत् ।
2. **पारायणकक्षा-**
   छात्रेण केशवगौडेन प्रौढमनारायाम् आङो नास्त्रियाम् सूत्रात् ईदन्तप्रकरणपर्यन्तं पारायणं कारितम्। छात्रो विमलतिवारी अष्टाध्याय्याः पञ्चमाध्यायस्य तृतीयचतुर्थपादयोः पारयणम् अकारयत्। पारायणकक्षायां सर्वे छात्राः मनोयोगेन पारायणम् अकुर्वन् ।
3. **विशिष्टं व्याख्यानम् –**
   आचार्याः भारतभूषणत्रिपाठिमहोदयाः स्थानिवदादेशोनल्विधौ सूत्रविषये विशेषं व्याख्यानमुर्वन्। तत्र च वतिप्रत्ययस्य अर्थः कः, अल् इति प्राधान्यार्थे अथवा गौणार्थे इति विधिग्रहणमावश्यकमुत न इत्यादयः विषयाः आसन्। त्रिपाठिमहोदयाः अत्यन्तं गूढतमं विषयं सारल्येन प्रास्तौदिति ।
4. **शास्त्रकक्षा-(प्रथमा)**
   आचार्याः श्रीधरमिश्राः प्रौढमनोरमायां सरूपाणामेकशेष एकविभक्तौ सूत्रे एकविभक्तौ परे इति प्राचां व्याख्यानविषये, सूत्रस्य जातिपक्षे व्यक्तिपक्षे च का आवश्यकता इति अबोधयन् ।
5. **शास्त्रकक्षा जिज्ञासासमाधानञ्च –**
   आचार्याः विष्णुकान्तमहोदयाः प्रौढमनोरमायां सुपः सूत्रविषये अपाठयन्। तत्र एकादशैव एकैकशः इत्यनयोः प्रयोगविषये पाठः आसीत्। अधीतविषयात् ये केऽपि प्रश्नाः आसन् ,तेषां समाधानम् आचार्यैः कृतमिति ।
6. **शास्त्रकक्षा – (द्वितीया)**
   आचार्याः श्रीधरमिश्राः सरूपाणामेकशेष एकविभक्तौ सूत्रे सविभक्तिकानामेकशेषः पक्षस्य विषये तथैव तत्रस्यविषये, वृद्धव्यवहारो नाम कः ,इत्यादिषु विषयेषु शब्दरत्ने विकाराः प्रसक्ताः, इत्यादीन् विषयान् अत्यन्तम् उत्कृष्टतया अबोधयन् ।
7. **रात्रिसत्रम् –**
   रात्रिसत्रे पाणिनि-कात्यायन-पतञ्जलिः इति गणत्रये विभज्य सूत्रान्त्याक्षरी समायोजिता । विद्यार्थिभिः अत्यन्तमुत्साहेन भागः गृहीतः । छात्रैः बहूनि सूत्राणि कथितानि, अथ प्रतियोगिता निर्णायकरूपेण प्रो.भारतभूषणत्रिपाठिमहोदयः, प्रो.विष्णुकान्तपाण्डेयमहोदयश्च आस्ताम् । अन्ते संयोजकमहोदयः प्रतियोगितायाः महत्त्वम् अबोधयत् । प्रो.भारतभूषणत्रिपाठिमहोदयः प्रो.श्रीधरमिश्रमहोदयः प्रो.विष्णुकान्तपाण्डेयमहोदयः अन्ये प्राध्यापकाश्च वर्गार्थिभिस्सह सामूहिकचित्रे विराजमानाः वर्तन्त इति।

# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्









# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

**दशमं दिनम्  ( 29-05-24 बुधवासरः)**

1. **पारायणकक्षा –**

   गायत्री इत्याख्या छात्रा प्रौढमनोरमायाः तृज्वत्क्रोष्टुः सूत्रव्याख्यानात् अजन्तस्त्रीलिङ्गप्रकरणे नेयङुवङ्स्थानावस्त्री सूत्रपर्यन्तं पारायणमकारयत्। जयपुरपरिसरस्य छात्रः वागीशः अष्टाध्याय्याः षष्ठस्य अध्यायस्य प्रथमपादस्य पारायणमकारयत्।

2. **विशिष्टं व्याख्यानम्- ( आचार्यः गोपालकृष्णशास्त्री)**

   आचार्याः गोपालकृष्णशास्त्रिणः स्फोटविषये विशिष्टव्याख्यानमकुर्वन्। तत्र प्रश्नः आसीत् कोऽसौ शक्त्या शक्त्याश्रयः शब्दः?, गौरित्यत्र कः शब्दः?, तथैव स्फोटः नित्यः एकः, स च वाचकः इति सिद्धान्तोक्तः। व्याख्यानेन सर्वे छात्राः श्रोतारश्च धन्याः अभूवन् ।

3. **शास्त्रकक्षा- (आचार्यः श्रीधरमिश्रः)**

   आचार्याः श्रीधरमिश्राः प्रौढमनोरमायम् अमिपूर्वः सूत्रादारभ्य अड्कुप्वाङ्नुम्व्यवायेपिसूत्रे नुम्ग्रहणमकर्तुं शक्यम् इति पर्यन्तमपाठयन्।

   आचार्याः श्रीधरमिश्राः शब्दरत्नसहितायां प्रौढमनोरमायाम् अड्कुप्वाङ्नुम्व्यवायेपिसूत्रे नुम्ग्रहणमकर्तुं शक्यम् इति प्रतिपाद्य पर्याणद्धम् इति रूपं साधयित्वा नक्षत्रं दृष्ट्वा वाचं विसृजेत् इति दृष्टान्तविषयम् अबोधयन्। तथैव रामेषु इति रूपसाधनपर्यन्तं पाठमकुर्वन्।

4. **शास्त्रचर्चा वाक्यार्थश्च –**

   सायं कक्षायाम् अक्षयभट्टः नामकच्छात्रः ङ्याप्रातिपदिकात् सूत्रस्य प्रौढमनोरमां  तथा च शब्दरत्नमाश्रित्य बहुगोमत्का इत्यादीनां विषये अवदत्। ।

5. प्रो.श्रीधरमिश्रमहाभागैः सह प्रतिभागिनां सामूहिकं चित्रम् ।





# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्















# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

**एकादशं दिनम् (30-05-24, गुरुवासरः)**

1. **पारायणकक्षा-**

   गुरुकुलीया छात्रा नन्दिनीगुप्ता अष्टाध्याय्याः षष्ठाध्यायस्य द्वितीयतृतीययोः पादयोः पारायणमकारयत्। गुरुकुलीया छात्रा शिवानीकुमारी प्रौढमनोरमायां वामि सूत्रात् अजन्तनपुंसकलिङ्गसमापनं यावत् समाप्य अजन्तपुल्लिङ्गादारभ्य ङ्याब्प्रातिकात् सूत्रान्तपर्यन्तं पारायणमकारयत्।

2. **विशिष्टव्याख्यानम् –**

   आचार्याः गोपालकृष्णशास्त्रिणः एकार्थीभावविषये विशिष्टव्याख्यानम् अकुर्वन्। शक्तं पदम् इति आरभ्य नैयायिकानां पक्षे कस्य अर्थवत्ता वैयाकरणानां कः पक्षः, समर्थः पदविधिः इति सूत्रविषये कुतः एकार्थीभावः स्वीकृतः,क्व एकार्थीभावो वर्तते तस्य प्रयोजनञ्च किम् इत्यादीनां समाधानं सर्वेभ्यः लब्धम्। आचार्याणां व्याख्यानेन सर्वे विद्यार्थिनां विषयज्ञानम् अवर्धत । मञ्जूषायां प्रातिपादिताः विषयाः आचार्येण अत्यन्तं सरलेन विधिना अपाठ्यन्त ।

3. **शास्त्रकक्षा-**

   आचार्याः नीरजभार्गवमहोदयाः अपदान्तस्य मूर्धन्यः इति सूत्रविषये अच च आदेशप्रत्यययोः सूत्रविषये अपाठयन्। अनयोः सूत्रयोः शब्दरत्ने यत् व्याख्यानमस्ति तस्य विषये आचार्याः प्राबोधयन् ।

   द्वितीयकक्षायाम् आचार्याः नीरजभार्गवमहोदयाः प्रौढमनोरमायाम् आदेशप्रत्यययोः सूत्रे सस्य मूर्धन्यः कः भवति?, दधिसेच इत्यत्र षत्ववारणस्यविषये तथा च रामौ इत्यस्य पदत्वस्य विचारे पाठमकारयन्। आचार्याणां नीरजभार्गवमहोदयानां स्वागतम् आचार्यविष्णुकान्तपाण्डेयमहोदयैः अकारि ।

4. **शास्त्रचर्चा जिज्ञासासमाधानञ्च –**

   अन्तिमे सत्रे जिज्ञासवो विद्यार्थिनः पाठ्यमानात् ग्रन्थात् प्रश्नान् अकुर्वन् । छात्राणां जिज्ञासानां समाधानम् आचार्यैः अकारि । केचन छात्राः विषयस्योपपादनम् अकार्षुः ।

   रात्रिसत्रे विद्यार्थिनः स्वातन्त्र्येण अध्ययनम् अकुर्वन् ।





# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्










# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

**द्वादशं दिनम्** ( 31-05-24 **शुक्रवासरः**)

1. **पारायणकक्षा-**
   छात्रा रम्या प्रौढमनोरमायां सुङस्योरिति इत्यारभ्य उभ उभय शब्दयोः विषये व्याख्यानपर्यन्तं पारायणमकारयत्। लखनऊपरिसरीयः विद्यार्थी उज्ज्वलपाण्डेयः अष्टाध्याय्याः षष्ठाध्यायस्य चतुर्थपादस्य पारयणमकारयत्।
2. **शास्त्रकक्षा – (प्रथमा)**
   आचार्याः नीरजभार्गवमहोदयाः शब्दरत्ने आदेशप्रत्यययोः सूत्रविषये दधिसेचः इत्यत्र कः समासः, तत्र षत्वप्रवृत्तिः कथं, पदादि इत्यस्य विग्रहवाक्यविषये च अपाठयन्।
3. **शास्त्रकक्षा – (द्वितीया)**
   आचार्याः नीरजभार्गवमहोदयाः शब्दरत्ने आदेशप्रत्यययोः सूत्रविषये दधिसेचः इत्यत्र षत्वापत्तिं कृत्वा उत्तरपदत्वे चापदादादिविधौ इत्यस्य वार्तिकस्य प्रत्याख्यानं कथम्, पदादिरित्यत्र सिद्धान्तः कः इत्यादिकमपाठयन्। आचार्येण तद्दिनस्य निर्धारितो विषयः शास्त्रनियमपूर्वकम् अध्यापितम् ।
4. **शास्त्रचर्चा, वाक्यार्थः, जिज्ञासासमाधानञ्च-**
   आचार्याः विष्णुकान्तपाण्डेयमहोदयाः सुङस्योरुकारेकारौ जशटङपाश्चेतः इत्यस्य शब्दरत्नं अपाठयन्। तथा 'ऋषिसहस्रमेकां कपिलामेकैकशः सहस्रकृत्वो दत्त्वा तया ते सर्वे सहस्रदक्षिणाः सम्पन्नाः' इत्यस्य एकैकशः शब्दस्य साधुत्वं च प्रत्यपादयन्।
5. सौम्यरञ्जनमिश्रच्छात्रेण सुङस्योरुकारेकारौ जशटङपाश्चेतः इत्यस्य व्याख्यानं कृतम्, अनुबन्धानां प्रयोजनं किमिति भाषितम्। छात्रैः बहवः प्रश्नाः पृष्टाः।
   स्वाध्यायसमये छात्राः अधीतविषयस्य अभ्यासम् अकुर्वन् , छात्राः शब्दरत्नात् नैकाः शङ्काः अकुर्वन् तासां शङ्कानां समाधानम् आचार्यैः सप्रमाणं प्रदत्तम् ।




# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

**त्रयोदशं दिनम् ( 01-06-24, शनिवासरः)**

1. **पारायणकक्षा-**

   राजीवगान्धीपरिरस्य छात्रा अरूषा वैद्यः प्रौढमनोरमाय् उभयशब्दस्य व्याख्यानादारभ्य वर्णाश्रमेतराणाम् इत्यस्य विषयारम्भपर्यन्तं पारायणमकारयत्। गुरुकुलीया छात्रा प्रियङ्का अष्टाध्याय्यां सप्तमस्य अध्यायस्य द्वितीयतृतीयचतुर्थपादानां पाठमकारयत्।

2. **विशिष्टकक्षा –**

   राष्ट्रियसंयोजकाः प्रो.कुलदीपशर्माणः छात्राणां नवसर्जनाय नवाचाराय च स्वरचिताः शतं प्रहेलिकाः अबूबुधन्। ppt माध्यमेन आचार्याः शतं प्रहेलिकाः अदर्शयन् अथ च छात्राः प्रहेलिकाः दृष्ट्वा उत्तरं प्राददुः । आचार्याणां कुलदीपशर्मणां नवाचारोऽयं श्लाघनायो वर्तते येन छात्राः नवां दृष्टिं प्राप्नुवन् इति ।

3. **शास्त्रकक्षा – (प्रथमा)**

   आचार्याः नीरजभार्गवमहोदयाः सर्वादीनि सर्वनामानि सूत्रविषये, तस्मिन् तद्गुणसंविज्ञानबहुव्रीहेः विषये तथा च द्वन्द्वे च सूत्रेण ज्ञापकेन सर्वान्तानां संज्ञा कथमित्यपाठयन्। सूत्रमिदम् आचार्येण मनोरमानुसारं पाठितम् ।

4. **शास्त्रकक्षा (द्वितीया)**

   आचार्याः नीरजभार्गवमहोदयाः प्रौढमनोरमायां सर्वान्तानां ग्रहणे प्रयोजनं किं, तथैव सर्वनाम्नः स्मै इत्यादिषु परविशेषणं वा विहितविशेषणं वा इत्यस्य समाधानं अददुः। आचार्याः विषयमिमं शब्दरत्नानुसारं विवेचनपूर्वकम् अपाठयन् ।

5. **जिज्ञासासमाधानं शास्त्रचर्चा च –**

   आचार्यैः सह छात्राः जिज्ञासानां समाधानम् अकुर्वन् । अस्मिन् सत्रे जयपुरपरिसरीयो विद्यार्थी श्रीवत्सः वाक्यार्थम् अकरोत् ।

   अस्मिन् सत्रे आचार्यविष्णुकान्तपाण्डेयमहोदयानां जन्मदिनमालक्ष्य छात्रैः स्वस्तिवाचनं विहितम् ।




# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

















# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

**चतुर्दशं दिनम् ( 02-06-24, रविवासरः)**

1. पारायणकक्षा –

   छात्रः ध्रुवकुमारः प्रौढमनोरमायां जराया जरसन्यतरस्याम् इत्यारभ्य हल्ङ्यादिसूत्रे प्रथमहल्ग्रहणस्य प्रयोजनव्याख्यानपर्यन्तं पारायणमकारयत्।
2. विद्यार्थी मोहितशर्मा अष्टाध्याय्यां अष्टमोध्यायस्य प्रथमद्वितीयतृतीयपादानां पाठमकारयत्।
3. शास्त्रकक्षा- (प्रथमा)

   आचार्याः नीरजभार्गवमहोदयाः पञ्चत्रिंशत् इत्यत्र कः समासः अङ्गीकार्यः, तथैव उभकौ इति रूपं कथम् इत्यादीनां विषये अपाठयन्।
4. विशिष्टव्याख्यानम् –

   शिक्षाशास्त्रविद्याशाखायाः अध्यक्षाः महान्तः शिक्षाशास्त्रविदः आचार्याः वाई.एस.रमेशमहोदयाः विशिष्टं व्याख्यानम् अकुर्वन्। आचार्यणां व्याख्यानस्य विषय आसीत् संस्कृतविद्यार्थी कथं स्यादिति ।

   व्याख्यानस्य केचन बिन्दवः-

1. संस्कृतविद्यार्थी जिज्ञासुः भवेत्।
2. संस्कृतविद्यार्थिनि चिकीर्षा स्यात्।
3. संस्कृतविद्यार्थी स्वप्रेरितो भवेत्।
4. संस्कृतविद्यार्थी संस्कृतभाषया व्यवहरेत्।
5. संस्कृतच्छात्रो भाषायाः द्विविधं रूपं जानीयात् प्रौढं सरलञ्च।
6. व्याकरणविद्यार्थी संस्कृतेन वाक्यार्थं कुर्यात्।
7. संस्कृतशास्त्राणि स्मृतौ भवेयुः अथ च कोशज्ञानं सम्यक् भवेदिति।
8. संस्कृतविद्यार्थी शास्त्राण्यधीत्य लोके संस्कृतस्य प्रचारं कुर्वीत।
9. संस्कृतविद्यार्थिनि शुश्रूषा पिपृच्छा च स्याताम्।

5. संस्कृतसेवनं प्रत्येकं विद्यार्थिनो लक्ष्यं भवेत्।

   अनेन प्रकारेण आचार्येण छात्राः स्वोद्बोधनेन शास्त्राणि प्रति प्राचोदिषत।

   रविवासरे मध्याह्ने भोजनात्परं स्वातन्त्र्येण अध्येतुम् अर्धदिनस्य विरामः प्रादीयत, इति ।

# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्










# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

**पञ्चदशं दिनम् ( 03-06-24, सोमवासरः)**

1. **पारायणकक्षा-**

   पारायणकक्षायां विद्यार्थी तुषारमिश्रः प्रौढमनोरमायां हल्ङ्यादि सूत्रे ङ्याप्ग्रहणं सोरेव विशेषणम् इत्यारभ्य क्रोष्टुशब्दस्य व्याख्यानान्तपर्यन्तं पारायणमकारयत्। गुरुकुलीया छात्रा सुमेशः अष्टाध्याय्याम् अष्टमोध्यायस्य चतुर्थपादस्य तथा प्रथमोध्यायस्य प्रथमद्वितीययोः पादयोश्च पारायणमकारयत्।

2. **विशिष्टं व्याख्यानम् –**

   राजीवगान्धीपरिसरस्य व्याकरणविद्याशाखीयाः आचार्याः सी.एस.एस.एन.मूर्तिमहोदयाः विशिष्टं व्याख्यानं प्राददुः ।आचार्याः सी.एस.एस.एन. मूर्तिमहोदयाः वैयाकरणभूषणसारस्य धात्वर्थप्रकरणस्य परिचयमकारयन्, फलव्यापारयोः धातुः। तिङर्थः विशेषणं भवति। फलं किम्? व्यापारः कः इत्यादयः विषयान् अबूबुधन्।

3. **शास्त्रकक्षा -**

- आचार्याः नीरजभार्गवमहोदयाः उभ इत्यस्य द्विवचनपरत्वाभावे एव अयच् प्रत्ययो भवति इत्यपाठयन्। उभ शब्दस्य सर्वादिगणस्य प्रत्याख्यानपक्षोपि उपस्थापितः।
- आचार्याः नीरजभार्गवमहोदयाः प्रौढमनोरमायाम् उभ शब्दः नित्यद्विवचनान्तो वा इति विषये, त्व त्व अनयोः सर्वादिगणे पठितयोः विषये,आत्मनि वाच्ये स्वशब्दः पुंसि अपि अस्तीति, आधुनिकसङ्केतो हि सञ्ज्ञा इत्यादीनां विषये अपाठयन्।
- छात्रः ध्रुवकुमारः प्रौढमनोरमानुसारेण अट्कुप्वाङ्नुम्व्यवाये सूत्रमधिकृत्य व्याक्यार्थमकरोत्। तत्र सूत्रार्थः कथं लब्धः, आदर्शेन इत्यादौ णत्ववारणप्रकारः कः, नुम्ग्रहणं किमर्थम् इति विषयाः आसन्। नीरजमहोदयाः 30 मई तः 3 जूनपर्यन्तम् अपाठयत् ।





# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्
















# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

**षोडशं दिनम् ( 04-06-24 मङ्गलवासरः)**

1. **पारायणकक्षा –**

   वेदश्री कुलकर्णी इत्याख्या छात्रा अष्टाध्याय्यां प्रथमस्य अध्यायस्य तृतीयपादस्य पारायणमकारयत्। प्रौढमनोरमायाः शब्दरत्नस्य च पारायणं राजीवगान्धीपरिसरस्य छात्रः राघवझा अकारयत् ।

2. **विशिष्टं व्याख्यानम् –**

   आचार्याः सि.एस्.एस्.एन् मूर्तिवर्याः वैयाकरणभूषणसारस्य धात्वर्थप्रकरणस्य विशिष्टमुपन्यासमकारयन्। मीमांसकानां मते भावना तिङर्थः तत्र के दोषाः तत्रापि भाट्टमते वृत्तिद्वयकल्पनया कर्तारं बोधयति तिङ्, प्रभाकरमते आरोपितेन कर्तारं बोधयति इति नैयायिकाः प्रथमान्तत्वेन यः शब्दः तेन कर्तुरभिधानं भवति इति स्वीकुर्वन्तीत्यादिकम् उक्त्वा, अन्ते सिद्धान्तपक्षोपि उपस्थापितः यथा, फलाश्रयः व्यापाराश्रयश्च तिङर्थः, कर्ता/कर्म, संख्या, कालः एते तिङर्थाः इत्यादि। अग्रे आख्यातार्थस्य कार्यकारणभावोपि प्रतिपादितः। मूर्तिमहोदयानां व्याख्यानेन विद्यार्थिनः उपकृताः अभूवन् । आख्यातार्थविचारे नैकानि मतानि आचार्येण प्रतिपादितानि, छात्राः व्याकरणदृष्ट्या शाब्दबोधम् अजानन् ।

3. **शास्त्रकक्षा (प्रथमा)**

   आचार्याः चन्द्रशेखरभट्टाः प्रौढमनोरमायां न बहुव्रीहौ सूत्रविषये प्रत्यपादयन्। यथोत्तरमुनीनां प्रामाण्यमिति विषयः तथैव अकृतव्यूहाः पाणिनीयाः परिभाषाया अनित्यत्वज्ञापनहेतवः उपन्यस्ताः। न बहुव्रीहौ इत्यस्मिन् सूत्रे सप्तमीग्रहणं प्रथमाबोधकमेवास्ति । बहुव्रीहिसमासे सति सर्वनामसञ्ज्ञा न भवति ।

4. **शास्त्रककक्षा –(द्वितीया)**

   आचार्याः चन्द्रशेखरभट्टाः शब्दरत्ने न बहुव्रीहौ सूत्रविषये व्याचख्युः। अकृतपरिभाषायाः अनित्यत्वज्ञापनप्रक्रिया प्रतिपादिता, यथोत्तरमुनीनां प्रामाण्यमित्यस्य प्रमाणमपि प्रदर्शितम्। प्रो.चन्द्रशेखरभट्टमहोदयानाम् औपचारिकं स्वागतं वर्गसंयोजकेन प्रो.विष्णुकान्तपाण्डेयमहोदयेन कृतम् ।

5. **शास्त्रचर्चा जिज्ञासासमाधानञ्च**

   छात्रः हर्षितसारस्वतः आदेशप्रत्यययोः इति सूत्रमाधृत्य विषयमाभाषत। आचार्याः जिज्ञासानां समाधानम् अकार्षुः । निर्धारितग्रन्थात् छात्राः प्रश्नान् अपृच्छन् । यो विद्यार्थी विषयम् उपास्थापयत्, आचार्याः छात्राश्च तम् उक्तात् विषयात् प्रश्नान् अपृच्छन् इति ।

6. **श्लोकान्त्याक्षरी-**

   रात्रिसत्रे श्लोकान्त्याक्षरी समायोजिता छात्रान् गणद्वये विभज्य गणयोः नामनी प्रदत्ते । छात्राः अन्त्याक्षरीप्रतियोगितायां नैकान् सुप्रसिद्धान् श्लोकान् अवोचन् । अन्त्याक्षरीप्रतियोगितायां आचार्याः चन्द्रशेखरभट्टमहोदयाः निर्णायकत्वेन आसन् । प्रतियोगितायाः अन्ते भट्टमहोदयाः प्रतियोगितायाः महत्त्वं समवोचन् अथ च श्लोकान् स्मृत्वा श्लोकेभ्यः व्याकरणस्य ज्ञानं कर्तव्यम् इति । आचार्येणोक्तं यत् सुभाषितरत्नभाण्डागारात् श्लोकाः स्मर्येरन् इति ।

# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्


















# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

**सप्तदशं दिनम्** ( 05-06-24 **बुधवासरः**)

1. **योगकक्षा-** क्रीडाभारत्याः योगशिक्षकः रविमहोदयः छात्रान् योगासनानि शिक्षितवान् ।
2. **विश्वपर्यावरणदिवसाचरणम्-**
   विश्वपर्यावरणदिवसमुपलक्ष्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरे अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गे वर्गसंयोजकैः प्रो.विष्णुकान्तपाण्डेयमहोदयैः अथ च प्रो.चन्द्रशेखरभट्टमहोदयैः छात्रैस्सह पादपारोपणं विहितम्।
3. **पारायणकक्षा-**
   छात्रः आशिषचौहाणः प्रौढमनोरमायां षड्भ्यो लुक् सूत्रादारभ्य अजन्तपुल्लिङ्गप्रकरणान्तं पारायणमकारयत्। लोकेशचन्द्रः बडसिलिया नामकच्छात्रः अष्टाध्याय्याः प्रथमोध्यायस्य तुरीयपादस्य द्वितीयोध्यायस्य प्रथमद्वितीययोः पादयोश्च पारायणमकारयत्।
4. **शास्त्रकक्षा (प्रथमा)**
   आचार्याः चन्द्रशेखरभट्टाः प्रौढमनोरमायां न बहुव्रीहौ सूत्रे न्यासकारस्य मते इत्थमस्तीति प्रक्रियाकौमुद्यादिषु उक्तस्य विषये अवयवानां यदि सर्वनामसंज्ञा तर्हि अतिसर्वाय इत्यत्र दोषं प्रादर्शयन्। तस्य खण्डनप्रकारमपि अपाठयन्। वस्तुतः कः सिद्धान्तः इत्यपि प्रत्यपादयन्।
5. **शास्त्रकक्षा (द्वितीया)**
   आचार्याः चन्द्रशेखरभट्टाः प्रौढमनोरमायां न बहुव्रीहौ सूत्रे न्यासकारस्य मतस्य खण्डनपर्यन्तमपाठयन्। सः अवोचत् यत् प्रियविश्व इत्यत्र सर्वनामसज्ञाप्रयुक्तं कार्यं न भवतीत्युच्यते, परन्तु त्वत्कपितृक इत्यादौ युष्मच्छशब्दस्य संज्ञा प्राप्नोत्येव इति।
6. **विशिष्टा कक्षा-**
   आचार्याः विष्णुकान्तपाण्डेयमहोदयाः स्व शब्दः कदा सर्वनामत्वं प्राप्नोति, बहिर्योगो नाम कः, पूर्वपरावर,,,, इत्यादि त्रिसूत्री गतार्थतां कथं प्राप्नोति इत्यादीनां विषये व्याचख्युः।
7. **शास्त्रार्थकक्षा-**
   वेदश्री कुलकर्णी इत्याख्या छात्रा प्रौढमनोरमायाम् उभ शब्दस्य अयच् विषयता कदा इत्यादिविषये अभाषत।
8. **विशेषः -** व्याकरणविद्याशाखायाः विभागाध्यक्षचराः आचार्याः शिवकान्तझामहोदयाः वर्गम् आगच्छन्, महोदयैः छात्राः प्राबोधयन्त ।

# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्










# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

**अष्टादशं दिनम् ( 06-06-24 गुरुवासरः)**

1. **विशेषव्याख्यानम् –**

   संस्कृतभारत्याः अखिलभारतीयसङ्घटनमन्त्रिणः माननीयाः दिनेशकामतमहोदयाः वर्गमागच्छन् , तेषां मार्गदर्शनं वर्गार्थिभिः लब्धम् ,महोदयैः छात्राः संस्कृतस्य प्रचाराय प्रसाराय च प्राबोध्यन्त , तैः अकथ्यत संस्कृतशास्त्राणाम् अध्यनेन संस्कृतस्य संरक्षणं भविष्यति ,संस्कृतस्य रक्षणं संस्कृतविद्यार्थिभिः कर्तुं शक्यत इति तेषां कथनमासीत् ।

   दिनेशकामतमहोदयानां स्वागतं परिसरनिदेशकैः राष्ट्रियसंयोजकैः वर्गसंयोजकैः च अक्रियत । संस्कृतेन भाषणम् , संस्कृतेन पाठनम् , संस्कृताय जीवनमिति प्रत्येकं संस्कृतविद्यार्थिनो लक्ष्यं स्यात् ।

   प्रातः परिसरे दिनेशकामतवर्यैः प्राध्यापकैः सह पादपारोपणं विहितम् ।

2. **शास्त्रकक्षा- (प्रथमा)**

   आचार्याः चन्द्रशेखरभट्टाः प्रौढमनोरमायां सर्वनाम संज्ञायाः निषेधसूत्राणां विषये तथा अल्लोपोनः सूत्रविषये च अपाठयन्। तत्र द्वन्दे च इति सूत्रेण द्वन्द्वसमासे अवयवानां संज्ञानिषेधः उत समुदायस्य, निर्जरसैः इति रूपस्य भाष्यप्रामाण्यं नास्ति ,इत्यादि विषयाः आसन्।

3. **शास्त्रकक्षा – (द्वितीया)**

   आचार्याः चन्द्रशेखरभट्टाः शब्दरत्ने द्वन्द्वे अवयवानां सर्वनामसंज्ञानिषेधे फलमस्ति उत न, समुदायस्य संज्ञानिषेधे फलं किम्, अल्लोपोऽनः सूत्रार्थः कथं लब्धः इत्यादीन् विषयानधिकृत्य पाठः प्राचलत्।

4. **वाक्यार्थकक्षा-**

   रुचिका नामाख्या छात्रा शब्दरत्ने उत्तरपदत्वे चापदादिविधौ वार्तिकस्य प्रत्याख्यानं कथमिति विषये अभाषत।





## अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्















## अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

**नवदशं दिनम् ( 07-06-24 शुक्रवासरः)**

1. **योगकक्षा-**

   योगकक्षायां शिक्षकत्वेन क्रीडाभारत्याः जयपुरप्रान्तशिक्षणप्रमुखः श्रीसत्यपालसिंहमहोदयः योगासनानि अकारयत् । महोदयः नैकानि आसनानि कारितवान् ।

2. **शास्त्रकक्षा- (प्रथमा)**

   आचार्याः चन्द्रशेखरभट्टाः शब्दरत्ने द्वन्द्वे अवयवानां सर्वनामसंज्ञानिषेधे फलमस्ति उत न, समुदायस्य संज्ञानिषेधे फलं किमित्यादि विषयानधिकृत्य पाठः प्राचलत्।

3. **शास्त्रकक्षा- (प्रथमा)**

   आचार्याः चन्द्रशेखरभट्टाः प्रौढमनोरमायां आङो नास्त्रियाम् सूत्रे अस्त्रियाम् इत्यस्य प्रयोजनविषये, अच्च घेः सूत्रे तकारः उच्चारणार्थः न तु सः इत्संज्ञकः इत्यादिविषयान् अबोधयन्।

4. **विशिष्टव्याख्यानं शास्त्रकक्षा च –**

   आचार्याः राजधरमिश्रवर्याः शब्दरत्ने अर्थवत् सूत्रे अधातुग्रहणाभावे यथोद्देशपक्षे प्रश्नमुत्थाप्य परिहारः कः, तथैव अकृव्यूहपरिभाषायाः अनित्यत्वज्ञापनमित्यादिविषये विशेषोपन्यासमकुर्वन्। आचार्याणां राजधरमिश्रवर्याणाम् औपचारिकं स्वागतं प्र.निदेशकाः प्रो.वाई.एस.रमेशवर्याः वर्गसंयोजकाः प्रो. विष्णुकान्तपाण्डेयमहोदयाः च अकुर्वन् ।

   आचार्याः राजधरमिश्रवर्याः शब्दरत्ने कृत्तद्धितसमासाश्च सूत्रे अप्रत्ययः इति अनुवर्तनीयम्, सूत्रार्थः कथं वर्णनीयः, अन्यथा कुत्र अतिव्याप्तिः इत्यादिकमब्रुवन्।

   छात्राणां कृते निर्धारितग्रन्थस्य प्रतिकृतयः विद्वद्भिः प्रादीयन्त ।

5. **शास्त्रार्थसत्रम्** – विपिन मिश्रच्छात्रः अड्कुप्वाङ्नुम्व्यवायेपि सूत्रविषये अभाषत। तत्र नक्षत्रं दृष्ट्वा वाचं विसृजेत्, दृष्टान्तमुपस्थाप्य लक्ष्ये समन्वयमप्यकरोत्।

6. **विशेषः -**

   व्याकरणवर्गम् अवलोकयितुं डी.डी.न्यूज इति प्रसारणमाध्यमस्य सदस्याः समागच्छन् । ते छात्रैः सह वर्गविषयिकीं चर्चाम् अकार्षुः, छात्राः वर्गसम्बन्धिनः विचारान् उपस्थापितवन्तः। वर्गसंयोजकाः आचार्याः विष्णुकान्तपाण्डेयमहोदयाः वर्गसम्बद्धाः सूचनाः प्रायच्छन् । अन्ते चैनलजनाः परिसरनिदेशकान् प्रो.वाई.एस.रमेशमहोदयान् वर्गस्यास्य उद्देश्यम् अपृच्छन् ।

# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्


















# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

**विंशं दिनम् ( 08-06-24, शनिवासरः)**

1. **योगकक्षा –**

   प्रशिक्षणवर्गस्य दिनचर्यानुसारं प्रातः षड्वादने योगासनकक्षा समजायत , योगशिक्षकः सत्यपालमहोदयः छात्राणां स्वास्थ्यदृष्ट्या योगासनानि प्राणायामाञ्च अकारयत् , योगासनस्य कक्षायां छात्रैः आसनानि कृतानि । ताडासनम्, सर्वाङ्गासनम्, वृक्षासनम्, इत्यादीनि आसनानि छात्रैः अभ्यसितानि ।

2. **पारायणकक्षा -**

   प्रशान्तकुमारच्छात्रः प्रौढमनोरमायाम् अजन्तस्त्रीलिङ्गप्रकरणादारभ्य अस्थिदधिसक्थि,,, सूत्रपर्यन्तं पारायणमकरोत् । विद्यार्थी आशिषचौहाणः अष्टाध्याय्यां द्वितीयोध्यायस्य तृतीयचतुर्थपादयोः पारायणमकारयत् ।

3. **शास्त्रकक्षा- (प्रथमा)**

   विद्वान् प्रियव्रतमिकश्रः महोदयः निर्धारितग्रन्थम् अध्यापयितुं वर्गम् आगच्छन् । आचार्याः प्रियव्रत् मिश्रमहोदयाः प्रौढमनोरमायाम् अनङ् सौ सूत्रे अनङ् ग्रहणं किमर्थम् , तथैव हल्ङ्यादिसूत्रे दीर्घ इति कयोः विशेषणम्, सुतिसि इत्यादीनां हला ग्रहणं कथमिति अपाठयन् । प्रियधरमिश्रमहोदयानाम् औपचारिकं वाचिकस्वागतं वर्गसंयोजकाः प्रो.विष्णुकान्तपाण्डेयमहोदयाः अकुर्वन् ।

4. **शास्त्रकक्षा- (द्वितीया)**

   द्वितीयकक्षायां विद्वांसः प्रियधरमिश्रमहोदयाः प्रौढमनोरमायां हल्ङ्याभ्यः सूत्रे दीर्घग्रहणस्य प्रयोजनमधिकृत्य अबोधयन् । अन्ते ङी ई,आ आप् इति प्रश्लेषः आश्रयणीयः इत्यब्रुवन् ।

5. **विशिष्टव्याख्यानम् –**

   आचार्याः राजधरमिश्र महोदयाः अर्थवत् सूत्रे अप्रत्यय इत्यस्य अभावे के दोषाः इति शब्दरत्नमाधारीकृत्य विशिष्टमुपन्यासमकुर्वन् अथ च अर्थवत् सूत्रे प्रत्ययान्तपर्युदासाभावे के दोषाः वस्तुतः तस्य दलस्य प्रयोजनं नास्ति इति शब्दरत्नमाधारीकृत्य विशिष्टमुपन्यासमकुर्वन् । आचार्य-राजधरमिश्रवर्याणां व्याख्यानेन सर्वे छात्राः नितराम् उपकृताः अभूवन् ।

6. **विशेषः** - समाचारप्लस इति प्रचारमाध्यमस्य सदस्याः वर्गम् आगत्य छात्रैः सह विद्वद्भिः सह वर्गविषयिकीं वार्ताम् अकुर्वन् ।

# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्















# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

**एकविंशं दिनम् ( 09-06-24 रविवासरः)**

1. **योगकक्षा-**

   रविवासरे क्रीडाभारत्याः प्रान्तयोगशिक्षणप्रमुखः सत्यपालमहोदयः योगसनानि अकारयत् ,तेन आसनानि सम्यक् प्रकारेण अकारि । वर्गसंयोजकैः प्रो.विष्णुकान्तपाण्डेयमहोदयैः तेषां स्वागतं व्यधायि इति । योगसनकक्षायां छात्राः अत्यन्तम् उत्साहेन भागं गृहीतवन्तः । छात्रेषु योगं प्रति रुचिः समुत्पन्ना अभवत् ।

2. **शास्त्रकक्षा- (प्रथमा)**

   विद्वांसः प्रियव्रतमिश्रमहोदयाः प्रौढमनोरमायां हल्ङ्याभ्यः सूत्रे अपृक्तग्रहणस्य भिनत्ति छिनत्ति इत्यादीनि प्रत्युदाहरणानि न भवन्ति तस्य प्रत्युदाहरणं न लभ्यते इत्यबोधयन्। हल्ङ्याभ्यो दीर्घात्.......इति सूत्रमादाय विशेषव्याख्यानम् अकुर्वन् ।

3. **शास्त्रकक्षा-(द्वितीया)**

   विद्वांसः प्रियव्रतमिश्रमहोदयाः प्रौढमनोरमायां हल्ङ्याभ्यः सूत्रे प्रथमहल्ग्रहणाभावे संयोगानातलोपेनैव सिद्ध्यति इति पूर्वपक्षस्य उत्तरं किं भवेत्, तत्रापि संयोगान्तलोपेपि राजन् इत्यादौ नलोपाभावः न शङ्क्यः न ङिसम्बुद्ध्योः सूत्रेण ज्ञापनमाश्रितत्वात् , तथैव भाष्यप्रामाण्यात् असम्भवाच्च ङ्यापोः इति सु इत्यस्यैव विशेषणमिति अपाठयन्।

   आचार्याः प्रियव्रतमिश्रमहोदयाः प्रौढमनोरमायाः मूलं बोधयन् शब्दरत्नम् अपाठयन् । शब्दरत्ने समागतान् पक्षान् अत्यन्तं सहजतया आचार्याः प्रत्यपादयन् ।

4. **जयपुरदर्शनम् -**

   अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गस्य विद्यार्थिनः जयपुरमहानगरस्य मुख्यानि स्थालानि अपश्यन्। (स्थलानि- अमरजवानज्योति, हवामहल, गोविन्ददेवमन्दिरम्, आमेरदुर्गम्, जलमहल, मोतीडूंगरी-गणेशमन्दिरम् ,बिडलामन्दिरम्, सिटीपार्क इत्यादीनि।जयपुरस्थ-आमेरदुर्गे विद्यार्थिभिः मङ्गलवचांसि आचर्यन्त। विद्यार्थिनः भ्रमणसमये सर्वत्र संस्कृयमयं वातावरणं निर्मातुं प्रायतन्त अथ च विद्यार्थिनः स्वव्यवहारेन सर्वान् प्राभावयन्।





# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्















# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

**द्वाविंशं दिनम् ( 10-06-24 सोमवासरः)**

1. **शास्त्रकक्षा- (प्रथमा)**

   विद्वांसः प्रियधरमिश्रमहोदयाः प्रौढमनोरमायां हल्ङ्याभ्यो दीर्घात् सुतिस्यपृक्तं हल् इति दीर्घं सूत्रं मास्तु ङ्यापः सोः इत्येव यदि भवति तर्हि उखास्रस्,सुपीः इत्यादौ दोषः स्यात् , अतः हल्ङ्याभ्यः सोः इति सूत्रं भवतु, तथैव राजा इत्यादौ संयोगान्तस्य लोपस्य सिद्धत्वे पूर्वं नलोप एव स्यात् इत्यस्य परिहारः कः इत्यादीन् विषयान् अपाठयन्।

2. **शास्त्रकक्षा- (द्वितीया)**

   विद्वांसः प्रियधरमिश्रमहोदयाः प्रौढमनोरमायां हल्ङ्याभ्यः दीर्घात् सुतिस्यपृक्तं हल् इति दीर्घं सूत्रं नावश्यकं हल्ङ्याभ्यो सोरित्येव सूत्रं भवत्विति दीक्षितानामाशयः, शब्दरत्नकारस्तु अबिभा राज्यमित्यादौ रेफलोपे दीर्घः न स्यादिति हल्ङ्याभ्यः सुतिसि हल् इति न्यासमिच्छतीति अब्रुवन्। ख्यत्यात्परस्य सूत्रार्थे कृतयणादेशः इति कथं लभ्यते इत्यपाठयन्।

3. **वाक्यार्थः-**

   प्रतिदिनं कक्षायां सायं छात्रैः वाक्यार्थः क्रियते एकः छात्रः शास्त्रविषयम् उपस्थापयति अन्यैः छात्रैः प्रश्नाः क्रियन्ते । राजीवगान्धीपरिसरस्य छात्रः राघवझा स्थानिवदादेशोनल्विधौ सूत्रविषये अभाषत ।

4. **रात्रिसत्रम् –**

   रात्रिसत्रे प्रतिभाप्रकटीकरणकार्यक्रमः समभूत् । छात्राः स्वप्रतिभानुसारं प्रस्तुतीः प्राददुः । छात्राः गीतानि, स्तोत्राणि, पद्यानि इत्यादीनि अश्रावयन् । प्रस्तोतारो विद्यार्थिनः सौम्यरञ्जनः, अरुषा, विमलतिवारी, राघवझा, मोहितः, वेदश्रीः कुलकर्णी, तुषारः इत्यादयः छात्राः स्वप्रस्तुतीः प्राददुः । आचार्यः प्रियव्रतमिश्रमहोदयः स्वरचितपद्यानि अश्रावयत् । सत्रेणानेन छात्राः आत्मनः प्रकटयितुं समर्थाः अभूवन् इति ।





# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्















## अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

**त्रयोविंशं दिनम् ( 11-06-24 मङ्गलवासरः)**

1. **शास्त्रकक्षा- (प्रथमा)**
   विद्वांसः प्रियधरमिश्रमहोदयाः प्रौढमनोरमायां घिसंज्ञायाः पर्युदासः केवलं सखिशब्दस्य न तु सख्यन्तस्य तस्मात् सुसखि शब्दस्य घिसंज्ञा अस्त्येव, तथैव षड्भ्यो लुक् सूत्रे बहुवचननिर्देशः किमर्थः, प्रत्ययलोपे प्रत्ययलक्षणं सूत्रेण कः नियमः क्रियते इत्यादीन् विषयान् अबोधयन्।
2. **शास्त्रकक्षा (द्वितीया)**
   विद्वांसः प्रियधरमिश्रमहोदयाः प्रौढमनोरमायां प्रत्ययलोपे प्रत्ययलक्षणं सूत्रकृतनियमस्य फलं किम् , वार्तिककारमते विद्ध्यर्थमिति पक्षे प्रत्ययस्य प्राधान्ये एव सूत्रमिदं प्रवर्तते, त्रिशब्दान्तस्य उपसर्जनत्वेपि विहितकार्याणि भवन्ति, तथैव औडुलोमी उडुलोमाः इति द्वावपि भिन्नशब्दौ इत्यादीन् विषयान् अपाठयन्।
3. **वाक्यार्थविचारः –**
   छात्रः केशवगौडः प्रौढमनोरमादिशा हल्ङ्यादिसूत्रविषये अभाषत। अनेन सूत्रस्य सर्वपक्षाः सिद्धान्तिताः।
4. **प्रश्नमञ्चः-**
   रात्रिसत्रे प्रश्नमञ्चस्य आयोजनमकारि, छात्रान् षड्सु गणेषु विभज्य व्याकरणस्य प्रसिद्धविदुषां नाम्ना अबिधानं च कृत्वा प्रतियोगिता समकारि, प्रश्नमञ्चे व्याकरणस्य, न्यायस्य, साहित्यस्य, वेदानाञ्च प्रश्नाः पृष्टाः आसन्। प्रश्नमञ्चकार्यक्रमे आचार्यैः प्रियव्रतमिश्रवर्यैः प्रश्नाः अक्रियन्त । अनेन कार्यक्रमेण छात्रेषु सर्वसंस्कृतग्रन्थान् प्रति रुचिः अजागः ।





# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्



















# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

**चतुर्विंशं दिनम् ( 12-06-24 बुधवासरः)**

1. **पारायणकक्षा-**

   शिखरशुक्लच्छात्रः प्रौढमनोरमायाम् अस्थिदधि,,, सूत्रात् अजन्तनपुंसकलिङ्गान्तपर्यन्तम्, पुनः अजन्तपुल्लिङ्गप्रकरणात् आरभ्य कृत्तद्धीतसमासाश्च सूत्रान्तपर्यन्तं पारायणमकारयत्। गुरुकुलीया छात्रा गायत्री इत्याख्या छात्रा अष्टाध्याय्यां चतुर्थाध्यायस्य प्रथमपादस्य पारायणमकारयत्।

2. **शास्त्रकक्षा -**

   आचार्याः कार्तिकभागवत् महोदयाः वातप्रमी शब्दस्य रूपाणि कथं भवति, नदीसंज्ञा घिसंज्ञा च वर्णस्य वा समुदायस्य इति अबोधयन्। आचार्याः कार्तिकभागवत् महोदयाः नदीसंज्ञा घिसंज्ञा च वर्णस्य इति पक्षे समुदायस्य इति पक्षे च दोषाः के, इयङुवङ्गास्त्रस्य विषये च अबोधयन्। आचार्यकार्तिकभागवतमहोदयस्य औपचारिकं स्वागतं वर्गसंयोजकाः आचार्यविष्णुकान्तपाण्डेयमहोदयाः अकुर्वन् । यू स्त्र्याख्यौ नदी इति सूत्रमाश्रित्य भाष्यपुरस्सरं नदीसंज्ञाविषयकविचारः समुपस्थापितः । अथ च शेषो घ्यसखि इति सूत्रमादाय घिसंज्ञाविषयकविचार उपापाद्यत । प्रौढमनोरमास्थं विचारं गृह्णन् तस्य शब्दरत्नेन सह समन्वयः स्थापितः।

3. **विशिष्टव्याख्यानम् –**

   शङ्कराचार्यसंस्कृतविश्वविद्यालयस्य व्याकरणविभागस्य आचार्याः विष्णुनम्बुदिरिमहोदयाः विशिष्टं व्याख्यानम् अकार्षुः। आचार्याः विष्णुनम्बूदिरिवर्याः प्रौढमनोरमायाम् अजन्तस्त्रीलिङ्गप्रकरणे रमा शब्दात् सुबुत्पत्तिः कथम्, सर्वनाम्नः स्याड्ढ्रस्वश्च सूत्रात् लघुन्यासः कर्तुं शक्यो वा इत्यादीन् विषयान् अपाठयन्। आचार्याः विष्णुनम्बुदिरिवर्याः शब्दरत्ने अचिरातेशान्नुड्बाध्यते इत्यस्य प्रत्याख्यानं कथम्, प्रौढमनोरमायां विभाषा द्वितीयातृतीयाभ्याम् सूत्रं न कर्तव्यमिति अपाठयन्। आचार्याणां स्वागतं वर्गसंयोजकः प्रो. विष्णुकान्तपाण्डेयमहोदयः अकरोत् ।

4. **शास्त्रचर्चा-**

   आचार्यैः सह छात्राः पठितविषयमाश्रित्य प्रश्नान् अकार्षुः । अजन्तप्रकरणे या शङ्काः छात्रैः समुत्पादिताः तासां प्रमाणपुरस्सरम् आचार्यैः समाधानम् अक्रियत ।





## अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

**पञ्चविंशं दिनम् ( 13-06-24 गुरुवासरः)**

1. **पारायणकक्षा-** छात्राः सामूहिकरूपेण निर्धारितग्रन्थस्य पारायणम् अकार्षुः ।
2. **शास्त्रकक्षा – (प्रथमा)**
   आचार्याः कार्तिकभागवत् महोदयाः वृश्चिकभियः, दुर्धियः इत्यादौ यण् कुतो न, क्वौ लुप्तं न स्थानिवत् वार्तिकमित्येवमादिविषये च अबोधयन्।
3. **शास्त्रकक्षा – (द्वितीया)**
   आचार्याः कार्तिकभागवत् महोदयाः ख्यत्यात् परस्य सूत्रे कृतयणादेशस्य फलं किम्, तृज्वत् क्रोष्टुः इत्यत्र कः अतिदेशः , अतिदेशाः के इत्यादीन् विषयान् अपाठयन्।
4. **विशिष्टव्याख्यानम्-**
   आचार्याः विष्णुनम्बूदिरिवर्याः प्रौढमनोरमायाम् अजन्तस्त्रीलिङ्गप्रकरणे मातुर्मातच् पुत्रार्थमर्हते वार्तिकविषये इत्येवमादीन् विषयान् अपाठयन्।
5. **शास्त्रार्थः-**
   लखनऊपरिसरीयः छात्रः शिखरशुक्लः रषाभ्यां नो णः समानपदे सूत्रविषये प्रतिपादनम् अकरोत् । तथैव लखनऊपरिसरीयः छात्रः सत्यप्रकाशः समासस्य विषये अभाषत।
6. **विशेषः –**
   आचार्याः विष्णुनुम्बूदिरिवर्याः छात्रान् सम्यक् विषयम् अबोधयन् । तेषाम् अध्यापनेन विद्यार्थिन उपकृताः अभूवन् ।



# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्








**सीखा प्राचीन व्याकरण शास्त्र परंपरा का ज्ञान**

जयपुर, समाचार जगत न्यूज. केंद्रीय संस्कृत विश्वविद्यालय जयपुर परिसर में चल रहे आवासीय अखिल भारतीय व्याकरण शास्त्र प्रशिक्षण वर्ग में छात्र प्राचीन व्याकरण शास्त्र परम्परा का अध्ययन प्राचीन गुरुकुल पद्धति के माध्यम से कर रहे हैं, जिसमें भारत के सुप्रसिद्ध वैयाकरण अलग-अलग सत्रों में छात्रों को प्रशिक्षण दे रहे हैं। वर्ग का मुख्य उदेश्य युवा शास्त्रीय विद्वानों को अगली पीढ़ी के लिये तैयार करना है। अखिल भारतीय शास्त्र प्रशिक्षण वर्ग के राष्ट्रीय संयोजक प्रो. कुलदीप शर्मा ने बताया कि इस प्रशिक्षण हेतु अखिल भारतीय स्तर पर परीक्षा का आयोजन हुआ इसमें चयनित छात्रों का साक्षात्कार परीक्षा के उपरांत इनका चयन हुआ है। वर्ग सह संयोजक नरेश सिंह ने बताया कि प्रशिक्षण शिविर में विजेता छात्रों को प्रथम स्थान प्राप्त करने वाले को 11 हजार रूपये का पुरुस्कार दिया जायेगा। द्वितीय स्थान प्राप्त करने वाले को 7000 तथा तृतीय स्थान वाले को 5000 रुपए का पुरुस्कार दिया जायेगा। जयपुर परिसर वर्ग संयोजक प्रो विष्णु कांत पाण्डेय ने बताया पूरे भारत से विद्वानों ने प्रोढ़ मनोरमा ग्रन्थ के अजन्त प्रकरण का अध्ययन करवाया जा रहा है।



केन्द्रीय संस्कृत विश्वविद्यालय

**युवा शास्त्रीय विद्वानों को कर रहे अगली पीढ़ी के लिए तैयार**

जयपुर @ पत्रिका प्लस. केंद्रीय संस्कृत विश्वविद्यालय में अखिल भारतीय व्याकरण शास्त्र प्रशिक्षण शिविर का आयोजन किया जा रहा है। इसमें विद्यार्थी प्राचीन गुरुकुल पद्धति से प्राचीन व्याकरण शास्त्र परंपरा का अध्ययन कर रहे हैं। राष्ट्रीय संयोजक प्रो. कुलदीप शर्मा ने बताया कि यह शिविर केन्द्रीय संस्कृत विश्वविद्यालय के तीन परिसरों में आयोजित किया जा रहा है। वर्ग का मुख्य उद्देश्य युवा शास्त्रीय विद्वानों को अगली पीढ़ी के लिए तैयार करना है। 19 जून तक चलने वाले शिविर में देशभर से चयनित 40 विद्यार्थी हिस्सा ले रहे हैं।



**केन्द्रीय संस्कृत विश्वविद्यालय में छात्र सीख रहे हैं प्राचीनव्याकरण शास्त्र परम्परा का ज्ञान**

**देश के मूर्धन्य विद्वान दे रहे है प्रशिक्षण एकमासीय आवासीय शिविर का हो रहा आयोजन**

कंट्री विजन/ जयपुर। केंद्रीय संस्कृत विश्वविद्यालय जयपुर परिसर में चल रहे एक मासीय आवासीय अखिल भारतीय व्याकरण शास्त्र प्रशिक्षण वर्ग में छात्र प्राचीन व्याकरण शास्त्र परम्परा का अध्ययन प्राचीन गुरुकुल पद्धति के माध्यम से कर रहे है। जिसमें भारत के सुप्रसिद्ध वैयाकरण अलग अलग सत्रों में छात्रों को प्रशिक्षण दे रहे हैं । अखिल भारतीय शास्त्र प्रशिक्षण वर्ग के राष्ट्रीय संयोजक प्रो. कुलदीप शर्मा ने बताया ये प्रशिक्षण शिविर केन्द्रीय संस्कृत विश्वविद्यालय के 3 परिसरो में आयोजित हो रहे हैं इस प्रशिक्षण हेतु अखिल भारतीय स्तर पर परीक्षा का आयोजन हुआ इसमें चयनित छात्रों का साक्षात्कार परीक्षा के उपरांत इनका चयन हुआ है। इन तीन जगह पर आयोजित हो रहे है शिविर जयपुर परिसर में व्याकरण शास्त्र प्रशिक्षण वर्ग,श्री रघुनाथकीर्ति परिसर देव प्रयाग न्याय शास्त्र प्रशिक्षण वर्ग, राजीव गांधी परिसर श्रृंगेरी कर्नाटक में अद्वैत वेदांत का प्रशिक्षण वर्ग आयोजित हो रहे हैं । वर्ग का मुख्य उदेश्य युवा शास्त्रीय विद्वानो को अगली पीढ़ी के लिये तैयार करना भविष्य की योजना अभी 3 शास्त्रों में यह प्रशिक्षण वर्गो की शुरुआत हुई है,भविष्य में विश्वविद्यालय के सभी 12 परिसरो में अलग अलग प्रशिक्षण शिविर आयोजित किया जायेगा। जयपुर परिसर वर्ग संयोजक प्रो विष्णु कांत पाण्डेय ने बताया पूरे भारत से पधारे विद्वानो ने प्रोढ़ मनोरमा ग्रन्थ के अजन्त प्रकरण का अध्ययन करवाया जा रहा हैं जिसमे तुलसी कुमार जोशी, बिल्वेश कुमार शर्मा केंद्रीय संस्कृत विश्वविद्यालय जम्मू परिसर के निदेशक आचार्य श्रीधर मिश्र एवं विवेकानंद मिशन इंस्टीट्यूट कोलकाता में आचार्य डॉ नीरज भार्गव, प्रो चंद्रशेखर भट्ट, प्रो विष्णु नम्बुदिरी, प्रो प्रियव्रत मिश्रा, डॉ राजधर मिश्र प्रो वाई एस रमेश संस्कृत भारती के अखिल भारतीय संघठन मंत्री, दिनेश कामत प्रो गोपाल कृष्ण शास्त्री ने छात्रों को प्राचीन व्याकरण प्रोढ़मनोरमा का ज्ञान प्रदान किया व विशिष्ट व्याख्यान के लिए आचार्य भारत भूषण त्रिपाठी केंद्रीय संस्कृत विश्वविद्यालय लखनऊ परिसर से पधारे उन्होंने पाणिनी सूत्रों की व्याख्या की तथा उनके गूढ़तम रहस्य को बताया। जयपुर परिसर के आचार्य प्रो विष्णुकान्तपांडेय ने पाणिनीय व्याकरण पर विशिष्ट व्याख्यान प्रदान किया जयपुर परिसर में शिक्षा शास्त्र के आचार्य कुलदीप शर्मा ने उनके द्वारा लिखित प्रहेलिका पुस्तक का व्याकरण की दृष्टि से अध्यापन करवाया, इस वर्ग का आयोजन 19 जून तक चलेगा। और इस वर्ग में अनेकों विद्वानों के द्वारा अध्यापन तथा विशिष्ट व्याख्यान प्रशिक्षनार्थिओं को दिया जायेगा।

# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

**षड्विंशं दिनम्** ( 14-06-24, **गुरुवासरः**)

1. **पारायणकक्षा** - छात्रैः निर्धारितग्रन्थस्य सामूहिकरूपेण पाठः व्यधायि ।
2. **शास्त्रकक्षा- (प्रथमा)**

   आचार्याः कार्तिकभागवत् महोदयाः प्रौढमनोरमायां रात्सस्य सूत्रे तकारस्य प्रश्लेषे अतिव्याप्तिः नास्ति यथालक्षणमप्रयुक्ते इति भाष्यात्, दृन्भू शब्दस्य विषये इत्यादीन् विषयान् अपाठयन्।
3. **शास्त्रकक्षा – (द्वितीया)**

   आचार्याः कार्तिकभागवत् महोदयाः नृ च सूत्रं छन्दोमात्रविषयो वा, गोतो णित् सूत्रे ओत् इति ग्राह्यम्, स्त्रिविषयावेव यौ नित्यम् भाष्यवाक्यस्य व्याख्यानं किम् इत्यादीन् विषयान् अपाठयन्। स्वीयं पाठ्यांशं सम्पूर्य स्त्रीलिङ्गे ङितिह्रस्वश्च इति सूत्रं सशब्दरत्नं विव्रीय, सरूपाणामेकशेष एकविभक्तौ इति सूत्रस्थान् एकशेषस्य सम्भावितान् पक्षान् उदबोधयन्।
4. **विशिष्टकक्षा वाक्यार्थश्च –**

   आचार्याः विष्णुकान्तपाण्डेय महोदयाः शेखररीत्या अर्थवत् इत्यस्य परिष्कारः कः इत्यबोधयन्। अथ च लखनऊपरिसरीयः छात्रः तुषारः अतो भिस ऐस् इति सूत्रमादाय सर्वान् पक्षान् उपास्थापयत् ।






# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

**सप्तविंशं दिनम् ( 15-06-24, शनिवासरः)**

1. **शास्त्रपारायणम् –**

   छात्राः सामूहिकरूपेण प्रौढमनोरमायाः अजन्तप्रकरणसहितं शब्दरत्नस्य पाठम् अकुर्वन् ।

2. **शास्त्रकक्षा- (प्रथमाकक्षा)**

   केन्द्रीयसंस्कृतविश्वविद्यालयस्य अगरतलापरिसरस्य सहायकाचार्याः डॉ.गणेश्वरझावर्याः पाठयितुं समागताः, तेषाम् औपचारिकं स्वागतं वर्गसंयोजकेन प्रो.विष्णुकान्तपाण्डेयवर्येण अकारि । आचार्याः गणेश्वरनाथझा महोदयाः प्रौढमनोरमायाम् अचि र ऋतः इति सूत्रमविषये, तत्र च अपवादत्वं नाम किम् इति अबोधयन्। **अचि र ऋतः** इत्यस्य सूत्रस्य सर्वोपि विचारः आचार्यैः समुपस्थापितः ।

3. **शास्त्रकक्षा- (द्वितीयकक्षा)**

   आचार्याः गणेश्वरनाथझामहोदयाः प्रौढमनोरमायां त्रिचतुरोः तिसृचतसृ आदेशौ वृत्तौ कदा भवति, जहत्स्वार्थावृत्तिर्नाम का,अजहत्स्वार्थावृत्तिर्नाम का इत्यादीन् विषयान् अबोधयन्। आचार्याणां व्याख्यानेन छात्राः नितराम् उपकृताः अभूवन् ।

4. **शास्त्रार्थकक्षा-**

   शास्त्रार्थकक्षायां गायत्री नामाख्याच्छात्रा **अच्च घेः** सूत्रविषये अभाषत।










# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

**अष्टाविंशं दिनम् ( 16-06-24, रविवासरः)**

1. **शास्त्रकक्षा- (प्रथमा)**

   आचार्याः गणेश्वरनाथझामहोदयाः प्रौढमनोरमायां न लुमताङ्गस्य अनित्यता कथम्, अनित्यतायां प्रकृते प्रियतिसृ प्रियत्रि इति रूपद्वयं प्रयोजनम्, इकोचि विभक्तौ इत्यत्र अचि इत्यस्य वैयर्थ्यं कथम् इत्यादीन् विषयान् अबोधयन्।

2. **परीक्षा –**

   रविवासरे सर्वेषां प्रतिभागिनां पाठ्यग्रन्थात् परीक्षा मध्याह्नात्परं त्रिवादनात् षड्वादनं यावत् घण्टात्रयात्मिका परीक्षा समपद्यत । परीक्षायां 29 छात्राः परीक्षाम् अलिखन् एकः अनोराग्यकारणात् परीक्षां न प्रादात् । सर्वे विद्यार्थिनः महता समुत्साहेन परीक्षां प्राददुः।






# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

**नवविंशं दिनम् ( 17-06-24, सोमवासरः)**

1. **शास्त्रकक्षा- (प्रथमा)**
   आचार्याः गणेश्वरनाथझामहोदयाः प्रौढमनोरमायां द्वे इत्यत्र टापि कर्तव्ये सन्निपाता परिभाषायाः अनित्यता केन ज्ञाप्यते, वामि इत्यत्र विधिविकल्पः कथं स्वीकृतः? इत्यादीन् विषयान् अबोधयन्।
2. **शास्त्रार्थकक्षा- (द्वितीया)**
   आचार्याः गणेश्वरनाथझावर्याः न षड्स्वस्रादिभ्यः, अतोऽम् इत्यादिसूत्राणाम् प्रौढमनोरमायाः अजन्तप्रकरणस्य शब्दरत्नसहितपूर्वकं व्याख्यानम् अकार्षीदिति ।
3. **विशिष्टव्याख्यानम् –**
   महान्तः शास्त्रविदः जगद्गुरुरामानन्दाचार्यस्य कुलपतिचराः रामकृष्णमाचार्यलुवर्याः पूर्वत्रासिद्धम् इति सूत्रमादाय व्याख्यानम् अकार्षुः ।
4. **विशिष्टसंवादः –**
   केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलसचिवाः आर.जी. मुरलीकृष्णवर्याः छात्रैः सह परिसंवादम् अकुर्वन् , ते स्वोद्बोधने छात्रान् शास्त्राणि पठितुं प्राचोदयन् । शास्त्रविदां संस्कृतं प्रति कानि कर्तव्यानि इति बोधम् अकारयन् । भविष्ये एतादृशाः संस्कृतशास्त्रवर्गाः केन्द्रीयसंस्कृतविश्वविद्यालयेन समायोजयिष्यन्ते इति कुलसचिवैः घोषणा अकारि ।
5. **विशेषः-**
   सायं कक्षायां विद्यार्थिनः वाक्यार्थम् अकुर्वन् । आचार्याः गणेश्वनाथझावर्याः छात्राणां मार्गदर्शनम् अकार्षुः ।





# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्














**दैनिक नवज्योति** Jaipur City - 16 Jun 2024 - Page 11

### केन्द्रीय संस्कृत विश्वविद्यालयः छात्र सीख रहे प्राचीन शास्त्र का ज्ञान



**ब्यूरो/नवज्योति, जयपुर।** केंद्रीय संस्कृत विश्वविद्यालय जयपुर परिसर में चल रहे एक माह के आवासीय व्याकरण शास्त्र प्रशिक्षण वर्ग में छात्र प्राचीन व्याकरण शास्त्र परम्परा का अध्ययन प्राचीन गुरुकुल पद्धति के माध्यम से कर रहे हैं। इसमें भारत के सुप्रसिद्ध व्याकरण अलग-अलग सत्रों में छात्रों को प्रशिक्षण दे रहे हैं।

अखिल भारतीय शास्त्र प्रशिक्षण वर्ग के राष्ट्रीय संयोजक प्रो. कुलदीप शर्मा ने बताया कि ये प्रशिक्षण शिविर केन्द्रीय संस्कृत विश्वविद्यालय के 3 परिसरों में हो रहे हैं, इस प्रशिक्षण के लिए अखिल भारतीय स्तर पर परीक्षा का आयोजन हुआ। इसमें चयनित छात्रों का साक्षात्कार परीक्षा के उपरांत इनका चयन हुआ है। शिविरों में जयपुर परिसर में व्याकरण शास्त्र प्रशिक्षण वर्ग, श्री रघुनाथ कीर्ति परिसर देव प्रयाग न्याय शास्त्र प्रशिक्षण वर्ग, राजीव गांधी परिसर कर्नाटक में अद्वैत वेदांत का प्रशिक्षण वर्ग हो रहे हैं।

अभी 3 शास्त्रों में यह प्रशिक्षण वर्गों की शुरुआत हुई है, भविष्य में विश्वविद्यालय के सभी 12 परिसरों में अलग-अलग प्रशिक्षण शिविर आयोजित किया जाएगा। जयपुर परिसर वर्ग संयोजक प्रो. विष्णु कांत पाण्डेय ने बताया पूरे भारत से पधारे विद्वानों ने प्रोढ मनोरमा ग्रन्थ के अजन्त प्रकरण का अध्ययन करवाया जा रहा हैं, जिसमे तुलसी कुमार जोशी, बिल्वेश कुमार शर्मा केंद्रीय वश्वविद्यालय जम्मू परिसर के निदेशक आचार्य श्रीधर मिश्र एवं विवेकानंद मिशन इंस्टीट्यूट कोलकाता में आचार्य डॉ.नीरज भार्गव सहित अन्य लोगों ने विचार व्यक्त किए।

**केन्द्रीय संस्कृत विश्वविद्यालय**

### युवा शास्त्रीय विद्वानों को कर रहे अगली पीढ़ी के लिए तैयार



**जयपुर @ पत्रिका प्लस.** केंद्रीय संस्कृत विश्वविद्यालय में अखिल भारतीय व्याकरण शास्त्र प्रशिक्षण शिविर का आयोजन किया जा रहा है। इसमें विद्यार्थी प्राचीन गुरुकुल पद्धति से प्राचीन व्याकरण शास्त्र परंपरा का अध्ययन कर रहे हैं। राष्ट्रीय संयोजक प्रो. कुलदीप शर्मा ने बताया कि यह शिविर केन्द्रीय संस्कृत विश्वविद्यालय के तीन परिसरों में आयोजित किया जा रहा है। वर्ग का मुख्य उद्देश्य युवा शास्त्रीय विद्वानों को अगली पीढ़ी के लिए तैयार करना है। 19 जून तक चलने वाले शिविर में देशभर से चयनित 40 विद्यार्थी हिस्सा ले रहे हैं।

# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

**त्रिंशं दिनम् ( 18-06-24 मङ्गलवासरः)**

1. **शास्त्रकक्षा -**

आचार्याः गणेश्वारनाथझा महोदयाः अतोऽमिति सूत्रे पदेच्छेदविचारादीन् वर्णयित्वा अतिजरमिति सिद्धिप्रकारम् अबोधयन्। एवं च नपुंसकलिङ्गे सर्वनामस्थानसंज्ञायां विशेषम्, औङः श्यां प्रतिषेधो वाच्यः इत्यादि विषयान् अबोधयन्। विद्वद्भिः प्रौढमनोरमास्थं विचारम् उद्बोध्य तस्य शब्दरत्नेन सह समन्वयः समुपस्थापितः। अर्थवत्वदलपरिष्काराभ्यासोऽप्यकारि।

2. **विशिष्टव्याख्यानम् –**

कर्नाटसंस्कृतविश्वविद्यालयस्य कुलपतिचराः महान्तः विद्वांसः न्यायवेदान्तमीमांसादिबहुशास्त्रविदः आचार्याः का. ई. देवनाथन् महोदयाः व्याकरणस्य बहुमुखोपयोगिताम् उदबोधयन्। पक्षप्रतिपक्षाभ्यां व्याकरणस्य अप्रामाण्यं समुपस्थाप्य व्याकरणमहाभाष्यदिशा प्रयोजनानि प्रतिपादितानि एवं पाणिनीयस्यास्य व्याकरणस्य लोकवेदोभयगतशब्दानुशासकत्वादुपादेयता च समुपस्थापिता। अनेन व्याख्यानेन छात्रेषु शास्त्रेऽस्मिन् श्रद्धा प्रवृत्तिः च अतीव जागरिता।

3. **भारतमाता पूजनम् -**

संस्कृतस्येदं ध्येयं यत् राष्ट्राय सर्वस्वं स्वस्मै स्वल्पमिति, एतां भावनां जागरयितुम् उपान्त्यदिनेऽस्मिन् अखण्डभारतपूजनं व्यधायि। छात्रैः अखण्डभारतस्य चित्रसंरचनाकारि। सायं दीपज्वालनपूर्वकं भारतमातुः नमनं देशभक्तिप्रदीपकगीतानां गायनं च समभूत्। अन्ते आचार्याः वाई. एस्. रमेशवर्याः अखण्डभारतसङ्कल्पनायाः विषये उदबोधयन्। भारतस्य स्वत्वं चतुर्भिः गुणैः सम्भवति। अन्तःकरणशुद्धिः, जीवकारुण्यसिद्धिः, पर्यावरणपरिरक्षणम्, विश्वबन्धुत्वभावः विस्मृतभेदाः सन्तो निर्मलभावापन्नाः इति गानं संपाठ्य छात्रान् अजागरूः। आचार्यसुदेशकुमारशर्मप्रभृतयः गण्याः विद्वासः इतरे प्रशिक्षणसहयोगिनः च समुपस्थिताभूवन्।





# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्















### कुलसचिव प्रो मुरलीकृष्ण ने की प्रशिक्षणार्थिओं से शास्त्रचर्चा, शास्त्रों का अधिक से अधिक प्रचार करें युवा विद्वान

खबरों की दुनिया

जयपुर। केन्द्रीय संस्कृत विश्वविद्यालय के द्वारा चल रहे एक मासीय आवासीय संस्कृत शास्त्र प्रशिक्षण वर्ग में केन्द्रीय संस्कृत विश्वविद्यालय के कुलसचिव रावुरी गायत्री मुरली कृष्ण ने सोमवार को ऑनलाइन माध्यम से जयपुर परिसर राजीव गांधी परिसर श्रङ्गेरी तथा देवप्रयाग परिसर में चल रहे शास्त्रप्रशिक्षण वर्ग को सम्बोधित करते हुये कहा की यह प्रशिक्षण वर्ग भारत सरकार की केन्द्रीय योजनाओं द्वारा संस्कृत शास्त्रों के संरक्षण हेतु आयोजित किया जा रहा है। विश्वविद्यालय के कुलपति प्रो श्रीनिवास वरखेड़ी के मार्गदर्शन में सभी निरंतर प्रयासरत है कि किस प्रकार शास्त्रों में निहित ज्ञान विज्ञान को समाजोपयोगी बना कर अग्रिम पीढी को सौंपा जाए। प्रो. मुरली कृष्ण ने प्रशिक्षणार्थिओं को कहा कि शास्त्रों का नियमित स्वाध्याय करने के साथ ही व्यापक स्तर पर आपको इसका प्रचार प्रसार भी करना है, जिससे जनसामान्य भी लाभान्वित हो सके। इसके लिए शास्त्र के पठन पाठन में कथा माध्यम का उपयोग किया जाना चाहिए। कथा माध्यम से शिक्षक की अध्यापन गति का विकास होता है। इस अवसर पर कुलसचिव रावुरि गायत्री मुरलीकृष्ण ने तीनो परिसरों के छात्रों से व्याकरण शास्त्र, न्याय शास्त्र और अद्वैत वेदांत शास्त्र में विद्यार्थिओं द्वारा सीखे गये विषयों पर शास्त्रचर्चा की और विद्यार्थियों की जिज्ञासाओं का समाधान किया। राष्ट्रीय संयोजक प्रो. कुलदीप शर्मा ने कार्यक्रम का संचालन किया। इस अवसर जयपुर परिसर संयोजक प्रो विष्णुकांत पाण्डेय, डॉ गणेश्वर नाथ झा, डॉ अमृता कौर, कार्तिक भागवत, डॉ सुभाष चंद्र मीणा, नरेश सिंह, पंकज पुरोहित सहित अनेक विद्वान् उपस्थित रहे।



### शास्त्रों का अधिक से अधिक प्रचार करें युवा विद्वान् : प्रो.मुरलीकृष्ण

■ कुलसचिव ने की प्रशिक्षणार्थिओं से शास्त्र चर्चा

जयपुर, (का.सं.)। केन्द्रीय संस्कृत विश्वविद्यालय के द्वारा चल रहे एक मासीय आवासीय संस्कृत शास्त्र प्रशिक्षण वर्ग में केन्द्रीय संस्कृत विश्वविद्यालय के कुलसचिव रावुरी गायत्री मुरली कृष्ण ने सोमवार को ऑनलाइन माध्यम से जयपुर परिसर राजीव गांधी परिसर श्रङ्गेरी तथा देवप्रयाग परिसर में चल रहे शास्त्र प्रशिक्षण वर्ग को सम्बोधित करते हुये कहा कि यह प्रशिक्षण वर्ग भारत सरकार की केन्द्रीय योजनाओं द्वारा संस्कृत शास्त्रों के संरक्षण हेतु आयोजित किया जा रहा है।

विश्वविद्यालय के कुलपति प्रो श्रीनिवास वरखेड़ी के मार्गदर्शन में सभी निरंतर प्रयासरत है कि किस प्रकार शास्त्रों में निहित ज्ञान विज्ञान को समाजोपयोगी बना कर अग्रिम पीढी को सौंपा जाए। प्रो. मुरली कृष्ण ने प्रशिक्षणार्थिओं को कहा कि शास्त्रों का नियमित स्वाध्याय करने के साथ ही व्यापक स्तर पर आपको इसका प्रचार प्रसार भी करना है, जिससे जनसामान्य भी लाभान्वित हो सके। इसके लिए शास्त्र के पठन पाठन में कथा माध्यम का उपयोग किया जाना चाहिए। कथा माध्यम से शिक्षक की अध्यापन गति का विकास होता है। इस अवसर पर कुलसचिव रावुरि गायत्री मुरलीकृष्ण ने तीनो परिसरों के छात्रों से व्याकरण शास्त्र, न्याय शास्त्र और अद्वैत वेदांत शास्त्र में विद्यार्थिओं द्वारा सीखे गये विषयों पर शास्त्रचर्चा की और विद्यार्थियों की जिज्ञासाओं का समाधान किया। राष्ट्रीय संयोजक प्रो. कुलदीप शर्मा ने कार्यक्रम का संचालन किया। इस अवसर जयपुर परिसर संयोजक प्रो विष्णुकांत पाण्डेय, डॉ गणेश्वर नाथ झा, डॉ अमृता कौर, कार्तिक भागवत, डॉ सुभाष चंद्र मीणा, पंकज पुरोहित सहित अनेक विद्वान् उपस्थित रहे।

नम्बर मिलाइए
9587884433
सिर्फ एक फोन कॉल पर विज्ञापन घर बैठे बुक करायें।

# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

### सम्पूर्तिसत्रम्

(19-06-24 बुधवासरः)

1. अध्यक्षः – आचार्यः श्रीनिवासवरखेडी (कुलपतिः, केन्द्रीयसंस्कृतविश्वविद्यालयः, देहली)
2. मुख्यातिथिः – आचार्यः के. ई. देवनाथन् (कुलपतिचरः, कर्णाटकसंस्कृतविश्वविद्यालयः, बेङ्गलूरु)
3. विशिष्टातिथिः – आचार्यः ब्रजभूषणओझाः (बनारसहिन्दूविश्वविद्यालयः, वाराणसी)
4. सान्निध्यम्  – प्रो. सुदेशकुमारशर्मा (के.सं.वि. जयपुरपरिसरः)
5. राष्ट्रियसंयोजकः – आचार्यः कुलदीपशर्मा (के.सं.वि. जयपुरपरिसरः)
6. वर्गसंयोजकः – आचार्यः विष्णुकान्तपाण्डेयः (के.सं.वि. जयपुरपरिसरः)
7. कार्तज्ञ्यम् – श्रीनवेरसिंहः (के.सं.वि. जयपुरपरिसरः)
8. सञ्चालकः – डॉ.कार्तिकभागवतः (के.सं.वि. जयपुरपरिसरः)

### कुलपतिवर्याणाम् आध्यक्ष्यीयमुद्बोधनम्

शास्त्रपण्डिताः शास्त्रार्थसभासु बालिकानां प्रवेशं न्यूनमात्रेण प्रोत्साहयन्ति पुनश्च वाक्यार्थावसरादिकं आधिक्येन न कल्पयन्ति इत्येवं मुधैव केचन आक्षिपन्ति । परं वास्तविकतां ज्ञातुं ते अस्माकं विश्वविद्यालयम् आयान्तु । अत्रत्यान् शास्त्रप्रशिक्षणवर्गादीन् क्रियाविशेषान् चापि मनाक् अवलोकयन्तु । तेनैव यथार्थज्ञानमुपजायते।

आचार्यात् पादमाधत्ते पादं शिष्यः स्वमेधया।
पादं सब्रह्मचारिभ्यः पादं कालक्रमेण च॥

कालक्रमेण अपि अर्जयितुम् अशक्यं ज्ञानं गुर्वनुग्रहेण सम्प्राप्तुं शक्यते एव । अद्य प्रशिक्षणं प्राप्तवतां छात्राणां शास्त्रार्थकौशलं दूरादेव दृष्ट्वा नितरां तृप्तोऽहम्। एतादृशवर्गस्य आयोजनाय शास्त्रपोषकमण्डली अस्माभिः आरचिता अस्ति । अस्याः अध्यक्षाः सदस्याश्च केचन अद्य जयपुरवर्गे एकत्रिताः सन्ति। एतेषां करकमलेषु निक्षिप्ताः एतैः चिताश्च प्रशिक्षणार्थिनः लब्धप्रतिष्ठैः विद्वद्भिः आमासं सुप्रशिक्षिताः अभवन्। प्रशिक्षिताः अग्रे शास्त्ररक्षां परम्परया राष्ट्ररक्षां च करिष्यन्ति। अतः साध्यक्षसदस्याः समन्वयकसहसमन्वयकाश्च अभिनन्दनार्हा एव। मत्प्रियाः छात्राः भवन्तः विद्यया सह विनयमपि अर्जयन्तु। विद्या विनयेन विना न शोभते। किञ्च गुर्वनुग्रहोऽपि यत्नेन सम्पादनीयः। अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रं श्रुतमेव । प्रातिपदिकस्थानीयोऽहम् अर्थवन्तश्च (शास्त्रार्थवन्तश्च) यूयम्। अतः भवन्तः भवत्यश्च सर्वदा सर्वथा च श्लाघ्या एव। अयं वर्गः सुष्ठु सम्पन्न इत्यतः कुलपतित्वेनापि धन्यताभावमनुभवामि । विशिष्य शास्त्रपोषकमण्डल्याः साध्यक्ष्यसदस्यान् समन्वयकान् संयोजकान् परिसरनिदेशकान् विशेषज्ञान च साधवाक्यैः प्रोत्साहयामि ।

# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

आचार्यः के. ई. देवनाथन्वर्याः अस्य सर्वस्य प्रशिक्षणवर्गस्य मूलभतस्य शास्त्रपोषकमण्डल्याः अध्यक्षाः। मुख्यातिथितिरूपेण उपस्थाय शस्त्रस्य महत्वमुदबोधयन्। अस्य प्रशिक्षणवर्गस्य पौनःपुन्येन आयोजनस्य अभिलाषां प्रकटय्य व्याकरणशास्त्राध्ययं सर्वेण संस्कृतविदा अवश्यंकार्यम्, एवं शाश्त्रेषु निहितं तत्वं विशेषाध्ययनेन एव सम्भवति इति वदन्तः सर्वान् स्वाशीर्वादेन अन्वगृह्णन्।

आचार्याः ब्रजभूषणओझाः अस्य सर्वस्य प्रशिक्षणवर्गस्य मूलभतस्य शास्त्रपोषकमण्डल्याः सदस्याः सन्तः विशिष्टातिथिरूपेण उपस्थाय वक्तव्यं प्रादुः। एवम् अपराह्णसत्रे अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रमादाय तत्र च विशेषेण अधातु इति पदस्य परिष्कारपद्धत्या उपपादनं कथस्यादिति प्रास्तुवन्।

आचार्याः सुदेशकुमारशर्माणः अस्य परिसरस्य निदेशषकाः सर्वस्य प्रशिक्षणवर्गस्य मार्गदर्शनं कुर्वन्तः स्वीये उद्बोधने व्याकरणवर्गस्य साफल्यं प्रकटन, भविष्ये ईदृषाः शस्त्रप्रशिक्षणवर्गाः अस्मिन्परिसरे समायोज्येरन् इति उदघोषयन्।

आचार्याः विष्णूकान्तपाण्डेयमहोदयाः समेषां वाचिकं स्वागतं प्राकटयन्। एवम् आचार्याः कुलदीपशर्माणः प्रतिवेदनं प्रतिपाद्य परीक्षायाः फलितांशस्य उद्घोषणमपि अकुर्वन्।

व्याकरणशास्त्रप्रशिक्षणवर्गे आधितविद्याः ६ सङ्ख्याकाः छात्राः अर्थवत्सूत्रस्य परिष्कारपद्धत्या शास्त्रार्थं समुपस्थापयन्। पूर्णस्य त्रिषुस्थानेषु प्रवृत्तस्य प्रशिक्षणवर्गस्य सम्पूर्तिः एकतन्त्रेण जयपुरपरिसरे एव समायोजिताभूत्, अन्यपरिसरद्वयस्य प्रतिभागिनः सद्यस्कमाध्यमेन संयुक्ता अभूवन्।

### व्याकरणशास्त्रप्रशिक्षणवर्गे प्राप्तस्थानानां छात्राणां सूची

**प्रथमस्थानम् –** अक्षयगोपालकृष्णभट्टः – राजीवगान्धीपरिसरः, शृङ्गेरी

**द्वितीयस्थानम् –** वेदश्री कुलकर्णी – कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः, रामटेकम्

**तृतीयस्थानम् –** आरुशा पी. वैद्य - राजीवगान्धीपरिसरः, शृङ्गेरी

**शालाकापरीक्षा –** उज्वलपाण्डेयः – लखनऊ परिसरः, लखनऊ





# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

# प्रतिवेदनम्









## छात्रप्रतिस्पन्दः

सर्वेभ्यो नमः। अमुष्मिन् प्रशिक्षणवर्गे अहञ्चित इत्येव महत्याः धन्यतायाः विषयः। आवासीयप्रशिक्षणवर्गे स्थित्वा आमासं ज्येष्ठानां विदुषां पाठान्, उपन्यासान् च श्रुत्वा कृतार्थः। मम भीतिरासीत् यदहं तादृशि वातावरणे स्वास्थ्येन कथमध्ययनं करिष्यामीति। परन्तु कुलपतीनां मार्गदर्शनेन प्रचलितेस्मिन् भोजनाद्यावासव्यवस्थाः अनुकूलकराः आरोग्यकराश्चासन्नित्यक्षतिः । अपवर्गे तृतीया सूत्रोदहरणानि साक्षादपश्यम्। सर्वात्मना धन्यतां प्रकटयामि। अग्रेपि एतादृग् वर्गः प्रचलेदिति मम आशा।

**- अक्षयगोपालकृष्णभट्टः**

**राजीवगान्धीपरिसरः, शृङ्गेरी**

एकमासं यावत् प्रचलिते अस्मिन् प्रशिक्षणवर्गे अस्मान् अतीव सारल्येन प्रौढमनोरमाविषयकज्ञानं प्रदत्तवतां गुरूणां धन्यवादाः । अयम् वर्गः अस्माकं अतीव लाभाय प्रकल्पितः, येन अस्माकं ग्रीष्मावकाशः सार्थकः जातः, तदर्थं तत्तदधिकरिभ्यो गुरुभ्यो कुलपतिवर्येभ्यश्च धन्यवादाः। वर्गस्यास्य व्यवस्था सम्यगासीत् तस्मादस्मकम् मासमेकं सम्यक्तया अतीतम्। अतः सर्वेषां परिसरस्य अन्तेवसिनां च धन्यवादाः।

**- विमलतिवारी**

**वेदव्यासपरिसरः, हिमाचलप्रदेशः**

धन्यः अहमेतादृशे प्रकल्पे मम नाम आगतम्। येन मम मनसि या प्रौढ़तमेषु शास्त्रेषु शास्त्रभीतिरासीत् सा निर्गता। यतोहि समेषामागतानामाचार्याणां पाठनशैली अत्यन्ता सरला सम्यग्बुद्धिगता चासीत्। अत्र चागतानां छात्राणां सर्वांगीणविकासाय भोजनावासीया व्यवस्थापि सुदृढासीत्। अथ चैतास्या: व्यवस्थाया: प्रधानभूता आसन्नस्माकं श्रीकुलपतिवर्या:। अत: तेषां प्रति आधर्ण्यं प्रकटयामि। अथ च अस्माकं निदेशकवर्यानपि धन्यवादान् ज्ञापयामि। येषां कारणात् एतावान्ग्रीष्मकालेपि अस्माकं पठने न कापि क्षतिर्जाता।

**- हर्षितसारस्वतः**

**जयपुरपरिसरः, जयपुरम्**

## अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

अस्माकं एकमासिकस्य ग्रीष्मकालीनावकाशस्य समाप्तिः दिव्यज्ञानेन अभवत् अस्मिन् प्रशिक्षणवर्गे वयं छात्राः बहु लाभान् प्राप्तवन्तः । विश्वविद्यालयेन छात्राणां कृते कृता व्यवस्थाः अतीव सुगमाः आसन्। एतदर्थं वयं सर्वे छात्राः आचार्येभ्यः अतीव कृतज्ञताम् प्रकटयामः। तथा च अस्माकं केन्द्रीयसंस्कृतविश्वविद्यालयस्य यशस्वी कुलपतिभ्यः आचार्येभ्यः अपि कृतज्ञतां प्रकटयामः। जयतु संस्कृतं जयतु भारतम्।

**- वागीशः**

**जयपुरपरिसरः, जयपुरम्**

एतादृशावसरप्रदातॄन् सकुलपतिवर्यं तथा च सर्वानाचार्यान् सश्रद्धं प्रणिपत्य आधमर्ण्यं प्रकटयामः। एकमासीयावसीयशास्त्रप्रशिक्षणवर्गेणानेनास्माभिरपूर्वं ज्ञानं प्राप्तम्। तथा चैकस्मिन्नेवस्थानेऽनेकेभ्यो आचार्येभ्योऽध्ययनस्यावसरमस्माभिर्लब्धमित्यस्माकं महत्सौभाग्यम्। तथा च भोजनावासादि सर्वविधोत्तमसौविध्येन मासं यावत् सुखेन स्थित्वास्माभिर्विविधज्ञानं लब्धम्। अतः येन केनापि प्रकारेण वर्गेस्मिन् स्वयोगदानं ये प्रदत्तवन्तः तेभ्यः सर्वेभ्य अस्माकं नमांसि कृतज्ञताश्च। जयतु संस्कृतं जयतु भारतम्।

**- उज्ज्वलपाण्डेयः**

**लखनऊ, जयपुरम्**

सर्वेभ्यो नमः। जयपुरपरिसरे प्रशिक्षणवर्गः आयोजितः आसीत् । तत्र च बहूनां छात्राणां चयनं जातमासीत्। बहवः विद्वांसः आगताः आसन् । सर्वेपि आचार्याः बहु सम्यक् पाठितवन्तः। तेषां पाठं श्रुत्वा सन्तोषः जातः। अध्यापनं च उत्कृष्टम् आसीत् । यदा अहं तत्र प्राप्तवती तदा घर्मकारणात् बहुक्लेशः जातः । परन्तु अस्माकं AC प्रकोष्टेषु व्यवस्था कृतासीत् इति कारणात् क्लेशः व्यपगतः। भोजनव्यवस्था अपि सम्यक् आसीत्। अस्मान् एकं दिनं बहिर्नीतवन्तः । तत्र च बहुत्र अस्माभिः अटितम्। तत्रत्यः अनुभवः सम्यगासीत् । अहं सर्वेभ्यः अध्यापकेभ्यः सादरं धन्यवादान् नमस्कारान् च समर्पयामि ।

**- आरुशा पी. वैद्यः**

**राजीवगान्धीपरिसरः, शृङ्गेरी**

## अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

सर्वेभ्यो नमो नमः। अयमेकमासाय प्रकल्पितः प्रशिक्षणवर्गः सर्वेषाञ्कृते अतीव लाभप्रदः ज्ञानवर्धकश्च आसीत्। यथा गंगायां स्नात्वा मनुष्यः स्वयंमेव पवित्रीभवति तद्वद् अस्माभिरपि गुरुचरणानां सान्निध्ये प्रयत्नेन विना आनन्देन च शास्त्राध्ययनपरम्परया प्रौढमनोरमा अधीता। अस्य वेदाङ्गस्य ज्ञानसागरे स्नात्वा वयं सर्वे धन्यधन्याः स्मः। अस्य कृते माननीय-कुलपतिवर्यान् कार्तज्ञं समर्प्य अहं निवेदयामि यत् एतादृशः शास्त्रमहोत्सवः अग्रेऽपि प्रचलेत्। धन्यवादाः॥

- **रुचिका**

**चोटीपुरागुरुकुलम्**

नमो नमः। जगज्जनन्याः जानक्याः जानकीजानेश्च प्रसादतः, कुलपतिमहोदयानां पतित्वे (स्वामित्वे), संयोजकमहोदयानां संयोजने शं योजितोऽयं व्याकरण-प्रशिक्षण-वर्गः। एकमासात्मकेऽखिलभारतीय-व्याकरणप्रशिक्षणवर्गेऽस्मिन् वयं प्रशिक्षिताः। तत्र भारतस्य शास्त्रावगाहनशेमुषीसम्पन्नैर्गुरुभिः वयमध्यगायिष्महि। समेऽपि गुरुचरणाः पाठ्यविषयं मनसि कृत्वा पङ्क्तिशः छात्रैः सह तादात्म्यभावेन प्राञ्जलया भाषया सम्यग्रूपेण जिज्ञासून् बोधितवन्तः। तत्रामासं संस्कृतमयं (शास्त्रमयं) वातावरणमासीत्। छात्राणां काठिन्यमाकलय्य, छात्राः यथा सौविध्यमनुभवेयुस्तदर्थं सर्वं कृतम्। रात्रिन्दिवमपि A.c. मध्ये वासः आसीत्। भोजनव्यवस्थात्युत्तमासीत्। मध्ये मध्येल्पाहारोपि सम्यगवर्तत। तत्र पाटवातिशयाधानाय सूत्रान्त्याक्षरी, श्लोकान्त्याक्षरी, प्रश्नमञ्चः, प्रतिदिनं शास्त्रार्थादयः बहवः कार्यक्रमा अवर्तिषत। नगरभ्रमणमपि बहु आनन्दकरमासीत्। समेषां मित्राणां गुरूणां सहायकानाञ्च व्यवहारः सरलः सहजश्चासीत्। मन्ये चायमभिनवः प्रकल्पोऽस्मत्सदृशां छात्राणां कृते महदुपकरिष्यतीति। अतः कुलपतिमहोदयान् प्रार्थयामि यदग्रेऽपि एतादृशः वर्गस्यायोजनं कुर्युः।

- **सत्यप्रकाशतिवारी**

**लखनऊ परिसरः**

श्री गुरुभ्यो नमः। अस्मिन् प्रशिक्षणवर्गे मया नैके विचाराः अधीताः। यथा आदौ प्राथम्येन समयपरिपालनम्, शास्त्रचर्चा, ग्रन्थाध्ययनम् एवम् इत्यादि। वर्गे भोजनव्यवस्था तथा च आवसव्यवस्था सुखकरी आसीत्। अयं च प्रशिक्षण वर्गः मुख्यतया छात्रेषु वाक्कौशलं वर्धयति। अतः ईदृग्वर्गाः अग्रे

सारणीयाः इति सादरं प्रार्थये। महान्तः अध्यापकाः समागत्य अत्यन्तं सरलतया विषयान् उद्बोदितवन्तः। अतः मनसा धन्यवादान् समर्पयामि।

**- रम्या एस्.**

**राजीवगान्धीपरिसरः, श्रृङ्गेरी**

नमो नमः। मत्कृते तु व्याकरणवर्गोऽयम् अद्भुतः आसीत्। यतो हि प्रथमदिनद्वयं त्रयं वा मया किमपि नावगतम्, तस्मात् अहं चिन्तितवान् यत् अस्मै वर्गाय अहं योग्यः नास्मि। किन्तु यथा यथा दिवसाः व्यतीताः तथा तथा आदरणीयगुरुजनैः कठिनातिकठिनविषयः अतीव सुलभतया अवबोधितः। तेन अधिकसमयपर्यन्तं तत्र स्थातुं इच्छा जागृता। अत्र अस्माभिः न केवलं शास्त्राध्ययनम् अपितु अस्माकं विकासाय अनुकूलानि अन्यानि कार्याणि अपि कृतानि, येषां शास्त्रेण सह सम्बद्धता अवश्यं भवितुमर्हति। यथा सूत्रान्तयाक्षरी, श्लोकान्त्याक्षरी, प्रतिवेदनलेखनम्, स्फूर्तिस्पर्धा इत्यादयः। एतादृशे उष्णकालेऽपि निवासस्य भोजनस्य च व्यवस्था अतीव उत्तमा आसीत्। आदरणीयकुलपतिमहोदयान् निवेदयामि यत् आगामिवर्षे अपि एतादृशः शास्त्रप्रशिक्षणवर्गः अस्माभिः पुनः प्राप्यते चेत् आभारतात् अस्मान् पाठयितुं समागतानां सर्वशास्त्रज्ञाचार्याणाम् इव बुद्धियुक्ताः छात्राः भवेम। भूयो भूयो धन्यवादाः।

**- ध्रुव कृष्णकान्त पुरोहितः**

**सोमनाथसंस्कृतविश्वविद्यालयः**

नमोनमः। सर्वप्रथममहं छात्रहितैषिणां यशस्विनां स्वकुलपतिमहोदयानां हार्दिकं धन्यवादं विज्ञापयामि, यत्तैर्व्याकरणशास्त्रतत्वजिज्ञासूनां छात्राणाङ्कृते एतादृशः महानवसरः प्रकल्पितः । वर्गेमुष्मिन् अस्मानध्यापयितुं नैके व्याकरणशास्त्रधुरन्धराः आचार्याः समागताः आसन्, यैर्बहुसरलया रीत्या पङ्क्तिशः अध्यापनं कारितं, सहैव वर्गे यानि विशिष्टव्याख्यानानि अभवन् तैरपि बहुविषयाः प्रकाशिताः। वर्गे आगताः समेपि छात्राः नानाप्रतिभासम्पन्नाः शास्त्रजिज्ञासवश्चासन्। तेन सम्पूर्णमपि वातावरणं शास्त्रमयं जातम् । वर्गे छात्राणां बहुविधविकासाय नाना स्पर्धा अपि आयोजिताः आसन्, भोजनावासादयाः सर्वाः व्यवस्थाः सुकरा आसन्, यदा यदा वर्गस्य विषये चिन्तयामि तदा "केन्द्रीयसंस्कृतविश्वविद्यालय उदात्तगुणाकरः" इति कुलगीतपङ्क्त्याः वास्तविकतामनुभवामि।

**- केशवप्रसादगौरः**

**भगवान्दासआदर्शसंस्कृतमहाविद्यालयः**

# अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

नमो नमः। केन्द्रीयसंस्कृतिविश्वविद्यालयेन आयोजिते एकमासिकव्याकरणप्रशिक्षणवर्गे विविधप्रदेशेभ्यः चत्वारिंशत् छात्राः चिताः, तेषां चयनं च उत्तमप्रक्रियया अभवत्। तदित्थं सर्वादौ सर्वेषु छात्रेषु प्रदत्तप्रथमपरीक्षायां षष्ठिछात्राः चिताः, तत्पश्चात् पुनः षष्ठिछात्राणां साक्षात्कारत्वेन परीक्षा स्वीकृता, यस्यां चत्वारिंशत् छात्राः एव चिताः अभवन्। एवञ्च अयं प्रशिक्षणवर्गः केन्द्रियसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरे मई मासस्य विंशतिदिनाङ्कादारभ्य जून मासस्य नवदशदिनाङ्कं यावत् अचलत् । एवञ्च अस्मिन् व्याकरणप्रशिक्षणवर्गे विविधपरिसरिसरेभ्यः विश्वविद्यालयेभ्यः उत्तमोत्तमाः यशस्विनः वैयाकरणाः विद्वांसः समागताः, ते च अस्मान् उत्तमोत्तमरीत्या बोधितवन्तः। अस्मभ्यं जयपुरपरिसरात् पाठ्यसामग्री अपि कल्पिता । तस्मिन् व्याकरणप्रशिक्षणवर्गे पठनेन सह अन्येऽपि गतिविधयः अजायन्त यथा अन्त्याक्षरि, शास्त्रार्थः, इत्यादयः तथा च भोजन-निवासादीनामपि उत्तमा व्यवस्था आसीत्। एतेन वयं बहु लाभान्विताः अभवाम। एतदर्थं अस्माभिः माननीयकुलपतिवर्येभ्यः संयोजकेभ्यश्च धन्यवादाः वितीर्यन्ते, ये सर्वासु परिस्थितिषु मार्गदर्शनं सहायतां च आचरितवन्तः इति ।

- **धीरजत्रिपाठी**

**लखनऊ परिसरः**

सर्वेभ्यो नमः। केन्द्रीयसंस्कृतविश्वविद्यालयद्वारा जयपुरपरिसरे एकमासीयो व्याकरणप्रशिक्षण वर्गः आयोजितः आसीत् । तत्रागतानां समेषां छात्राणां परीक्षासाक्षात्काराभ्याञ्चयनं जातमासीत्। आभारताद्बहवो विद्वांसः आगताः आसन् । समेऽप्याचार्याः बहु सम्यक् पाठितवन्तः । तेषां पाठाञ्छ्रुत्वा सन्तोषो जातः। अध्यापनञ्चोत्कृष्टमासीत् । घर्मावश्यकव्यवस्थाबाहुल्येन न कोऽपि कष्टो जातः। भोजनव्यवस्थाऽपि सम्यगासीत्। अस्मान्नेकं दिनं बहिर्णीतवन्तः।तत्र च बहुत्रास्माभिरटितम् । तत्रत्याः अनुभवास्सम्यगसन्। अहं सर्वेभ्यः अध्यापकेभ्यस्सादरं धन्यवादाः नमस्काराञ्च समर्प्य शास्त्रसंरक्षणावसरप्रकल्पवद्भ्यस्समेभ्य आचार्येभ्यः प्रार्थये एतादृशान्यवसराणि वयम्पुनरपि प्राप्नुयुः।

- **लोकेशचन्द्रबडसिलिया**

**श्रीरघुनाथकीर्तिपरिसरः**

## अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

### विद्वत्प्रतिस्पन्दः

भवतश्च भवत्साचिव्यं विनयेन विद्यया च सुसमीचीनतया निरूढवतो: कार्तिकनरेशयोश्च योयं वैयाकरण:कार्यक्रम: सोस्माकं स्मृतितले विलसतितरां विलसितातराम्। आभारतं विद्यापीठस्य यश: प्रासरीस: । वयमपि कृतार्थ्यक्रियामहि। धन्यवादा: ।

**प्रो. के. विष्णुनम्बूदिरिः**

**श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालयः, कालटी**

सशब्दरत्नं मनोरमायाः पङ्क्तिशः गुरुमुखात्पाठोऽद्यत्वे दुर्लभायते । तत्र पुनः अजन्तभागस्याध्ययनं नाम इतोऽपि वैरल्यं भजते । एतादृशे काले केन्द्रीयसंस्कृतविश्वविद्यालयस्यायं शास्त्रप्रशिक्षणवर्गरूपको योऽयमुपक्रमः स नितान्तं स्थान एव प्रावर्त्तिष्ट । देशस्य नैके प्रथितनामानो वैयाकरणाः समागत्यात्र अपाठिषुः । दिष्ट्या मामकीनोऽप्यवसरो विद्वद्भिः समुपाकल्पीति आत्मानं धन्यं मन्ये । दि. 08-06-24 तः 11-06-24 दिनाङ्कं यावत् **"अनङ् सौ"** इति सूत्रादारभ्य **इकारान्तशब्दं** यावत् शब्दरत्नेन सह मनोरमा पाठिता मया यथाकालं यथास्थानम् । पिपठिषवश्छात्राः सश्रद्धं कालांशेषूपविश्य यथावद्विषयान् संगृह्य पुनस्तत्र विचिकित्सामपि अजजागरन्निति नितान्तं प्रमोदास्पदमिदं समजनि । सायङ्काले पुनः नैके कार्यक्रमाः समायोजिषत । तत्र च ममावधौ **"प्रातिभम्"** इति छात्राणां अन्तःस्थितां प्रतिभामद्राक्षम् । अपरस्मिन् दिने च **शास्त्रीयस्फूर्त्तिस्पर्धा** आयोजकैः समुपाकल्पि यत्र छात्रा अहमहमिकया भागमग्रहीषुः । आवासभोजनादिव्यवस्थात्यन्तं चारुतरासीदिति समाम्रेड्य संयोजकान् तत्सहयोगिनश्च धन्यतावचोभिराप्लावयामि । एवमवसरं कल्पितवद्भ्यः समेभ्योऽपि विद्वन्मचर्चिकाभ्यः सश्रद्धं नमोवाकं प्रशास्य विस्तराद्विरंरमीमि ।

**डॉ. प्रियव्रतमिश्रः**

**सहाचार्यः, स्नातकोत्तरव्याकरविभागः**

**श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, पुरी**

प्रतिपित्सूनां प्रतिपत्तिवर्धनाय भारतीयज्ञानपरम्पराया:संरक्षणाय च केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरे अनुष्ठितव्याकरणशास्त्रप्रशिक्षणवर्गे प्रशिक्षकत्वेनात्मानमुपस्थाप्य महान्तमानन्दमनुभवामि। अस्मिन् प्रशिक्षणवर्गे प्रतिभावन्तो विनीताश्च जिज्ञासवो देशस्यानेकेभ्यो

## अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गः, जयपुरपरिसरः

## प्रतिवेदनम्

विश्वविद्यालयमहाविद्यालयगुरुकुलेभ्यःसमागत्य भागमग्रहीषुः। अत्रत्या भोजनावासादिव्यवस्थात्यन्तमुत्कृष्टासीत्।

**- गणेश्वरनाथझाः**

**एकलव्यपरिसरः, अगर्तला**

केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरे समायोजिते आवासीयव्याकरणशास्त्रप्रशिक्षण-कार्यक्रमे प्रशिक्षकरूपेण भागं गृहीत्वा महान् सन्तोषः जातः। तत्र आवासादिव्यवस्था उत्तमा आसीत्। अध्यापनस्य कृते अत्यन्तम् अनुकूला व्यवस्था परिसरपक्षतः कृता। तत्र भारतस्य विभिन्नेभ्यः प्रान्तेभ्यः समागताः व्याकरणच्छात्राः अपि उत्कृष्टाः अध्ययनपरायणाश्च आसन्। अतः तत्र शास्त्रं पाठयित्वा अत्यन्तम् आनन्दम् प्राप्तवान्। केन्द्रीयसंस्कृतविश्वविद्यालयेन शास्त्रसंरक्षणाय एतादृशः प्रकल्पः कृतः, तत्र च अध्यापनाय अहम् आहूतः इति मे भागधेयम् इति अहं चिन्तयामि। अतः केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिचरेभ्यः, जयपुरपरिसरस्य संयोजकेभ्यः, अन्येभ्यः सर्वेभ्यश्च सप्रश्रयं कार्तज्ञ्यं विज्ञापयामि॥

**- डॉ. नीरजभार्गवः**

**विवेकानन्दशोधसंस्थानम्, कोलकात्ता**

केन्द्रीय संस्कृत विश्वविद्यालयस्य जयपुर परिसरे आयोजिते अखिलभारतीयव्याकरणशास्त्रप्रशिक्षणवर्गे मया दिनत्रयं (23, 24, 25-05-24) अध्यापितम्। केन्द्रीयसंस्कृतविश्वविद्यालयस्य परिसरेषु अध्ययनवातावरण प्रतिनित्यम् इतोधिकं वर्धनीयमित्यभिप्रायेणैव कार्यं करोतीति विश्वप्रचं वर्तते। अध्ययनाध्यापनवातावरणपरिकल्पनैव विश्वविद्यालयस्य मुख्यम् उद्देश्यं भवत् तदत्र मया प्रत्यक्षनया अनुभूतम्। एवमेव कार्यक्रमस्यास्य संयोजकः प्रो. विष्णुकान्त पाण्डेय महाभागः, एवमेव डा. नरेश सिंग महाभागः च विशेषतः अभिनन्दनीयौ। कार्यक्रमनिर्वाहकैः अध्यापकानां विशिष्य छात्राणां कृते च अपेक्षितान् सर्वान् अंशान् पूरयितुं सततम् उद्युक्तैः स्थितमिति तेषां हृदयवैशाल्यमपि सूचितं भवति। एवमेव एतादृशछात्रोपयोगिकार्यक्रमाः निरन्तरं भवेयुः इति भगवन्तं विश्वनाथं संप्रार्थ विरमामि।

**- डॉ. कुप्पाबिलवेशशर्मा**

**सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी**

# केन्द्रीयसंस्कृतविश्वविद्यालयः

(संसदः अधिनियमेन स्थापितः)
राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा A++ श्रेण्या प्रत्यायितः
**जयपुरपरिसरः, जयपुरम्**

क्र. सं. ............. दिनाङ्कः ......................

## एकमासात्मकोऽखिलभारतीय आवासीयो व्याकरणशास्त्रस्य

# प्रशिक्षणवर्गः

20 मईतः 19 जून 2024 यावत्

# प्रमाणपत्रम्

आयुष्मान्/आयुष्मती ...........................................................................

........................................................................................ इति संस्थायाः

.................................................... छात्रः/छात्रा केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरेण **"प्रौढमनोरमायाः शब्दरत्नसहितम् अजन्तप्रकरणम्"** इति ग्रन्थमवलम्ब्य कालयुक्तसंवत्सरस्य/क्रोधिसंवत्सरस्य वैशाखशुद्धद्वादशीतः ज्येष्ठशुद्धत्रयोदशीपर्यन्तं समायोजिते एकमासात्मके व्याकरणशास्त्रप्रशिक्षणवर्गे समायोजिते शास्त्रपरीक्षणे .......................... स्थानम् अवाप्य........................... पुरस्कारराशिं प्रापत् ।

| | | |
|---|---|---|
| प्रो. विष्णुकान्तपाण्डेयः | प्रो. कुलदीपशर्मा | प्रो. सुदेशकुमारशर्मा |
| वर्गसंयोजकः | राष्ट्रियसंयोजकः | निदेशकः |

# केन्द्रीयसंस्कृतविश्वविद्यालयः

(संसदः अधिनियमेन स्थापितः)
राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा A++ श्रेण्या प्रत्यायितः
**जयपुरपरिसरः, जयपुरम्**

क्र. सं. ..............

**एकमासात्मकोऽखिलभारतीय आवासीयो व्याकरणशास्त्रस्य**

# प्रशिक्षणवर्गः

**कालयुक्त/श्रीक्रोधिसंवत्सरस्य वैशाखशुद्धद्वादशीतः ज्येष्ठशुद्धत्रयोदशीपर्यन्तम्**

20 मईतः 19 जून 2024 यावत्

## प्रमाणपत्रम्

प्रमाणीक्रियते यत् प्रो./डॉ. ..............................................................

इत्यनेन विदुषा केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरेण **"प्रौढमनोरमायाः शब्दरत्नसहितम् अजन्तप्रकरणम्"** इति ग्रन्थमवलम्ब्य समायोजिते एकमासात्मके व्याकरणशास्त्रप्रशिक्षणवर्गे ....../....../2024 दिनाङ्कतः ....../....../2024 दिनाङ्कं यावत् संसाधकत्वेन उपस्थाय ........... कालांशेषु निर्दिष्टं विषयं प्राववर्तिष्ट । एतदर्थं वयं भृशम् अभिनन्दामः।

| प्रो. विष्णुकान्तपाण्डेयः | प्रो. कुलदीपशर्मा | प्रो. सुदेशकुमारशर्मा |
|---|---|---|
| वर्गसंयोजकः | राष्ट्रियसंयोजकः | निदेशकः |

# केन्द्रीयसंस्कृतविश्वविद्यालयः

(संसदः अधिनियमेन स्थापितः)
राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा A++ श्रेण्या प्रत्यायितः
जयपुरपरिसरः, जयपुरम्

क्र. सं. ..............

## एकमासात्मकोऽखिलभारतीय आवासीयो व्याकरणशास्त्रस्य

# प्रशिक्षणवर्गः

**कालयुक्त/श्रीक्रोधिसंवत्सरस्य वैशाखशुद्धद्वादशीतः ज्येष्ठशुद्धत्रयोदशीपर्यन्तम्**

20 मईतः 19 जून 2024 यावत्

## प्रमाणपत्रम्

प्रमाणीक्रियते यत् प्रो./डॉ. ..................................................................

इत्यनेन विदुषा केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरेण **"प्रौढमनोरमायाः शब्दरत्नसहितम् अजन्तप्रकरणम्"** इति ग्रन्थमवलम्ब्य समायोजिते एकमासात्मके व्याकरणशास्त्रप्रशिक्षणवर्गे ........–......../......../ 2 0 2 4 इत्यनयोः दिनाङ्कयोः विशिष्टव्याख्यानं प्रादात्। एतदर्थं वयं भृशम् अभिनन्दामः।

| | | |
|---|---|---|
| प्रो. विष्णुकान्तपाण्डेयः | प्रो. कुलदीपशर्मा | प्रो. सुदेशकुमारशर्मा |
| वर्गसंयोजकः | राष्ट्रियसंयोजकः | निदेशकः |

# केन्द्रीयसंस्कृतविश्वविद्यालयः

(संसदः अधिनियमेन स्थापितः)
राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा A++ श्रेण्या प्रत्यायितः
**जयपुरपरिसरः, जयपुरम्**

क्र. सं. .............                                        दिनाङ्कः .....................

## एकमासात्मकोऽखिलभारतीय आवासीयो व्याकरणशास्त्रस्य

# प्रशिक्षणवर्गः

20 मईतः 19 जून 2024 यावत्

## प्रमाणपत्रम्

आयुष्मान्/आयुष्मती .....................................................................

..................................................................................... इति संस्थायाः

..................................................... छात्रः/छात्रा केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरेण **"प्रौढमनोरमायाः शब्दरत्नसहितम् अजन्तप्रकरणम्"** इति ग्रन्थमवलम्ब्य कालयुक्तसंवत्सरस्य/क्रोधिसंवत्सरस्य वैशाखशुद्धद्वादशीतः ज्येष्ठशुद्धत्रयोदशीपर्यन्तं समायोजिते एकमासात्मके व्याकरणशास्त्रप्रशिक्षणवर्गे सोत्साहं सश्रद्धञ्च भागम् अग्रहीत्।

| | | |
|---|---|---|
| **प्रो. विष्णुकान्तपाण्डेयः** | **प्रो. कुलदीपशर्मा** | **प्रो. सुदेशकुमारशर्मा** |
| वर्गसंयोजकः | राष्ट्रियसंयोजकः | निदेशकः |

# केन्द्रीयसंस्कृतविश्वविद्यालयः जयपुरपरिसरः

**व्याकरणविद्याशाखा**

## अखिलभारतीय-व्याकरणशास्त्रप्रशिक्षणवर्गः

**प्रौढमनोरमा शब्दरत्नसहिता (अजन्तान्तः)**

**समयः - ०३ वादनात् ०६ वादनम्** **दिनाङ्कः- १६/०६/२०२४**

**I. एकेन वाक्येन उत्तरत ।** **२०x२ = ४०**

१. अर्थवत् इत्यत्र मतुबर्थः कः?

२. पञ्चनावप्रियः इत्यत्र पञ्चनावेत्यस्य तद्धितान्तत्वनिबन्धना प्रातिपदिकसंज्ञा कुतः न?

३. टिघुभादिवत् लघुसंज्ञायां कर्तव्यायाम् अर्थवत्सूत्रे महासंज्ञाकरणं किमर्थम्?

४. लिङ्गविशिष्टपरिभाषया किम् अतिदिश्यते?

५. मूलकेनोपदंशमित्यादिवाक्ये कृद्ग्रहणेन अतिप्रसक्ता प्रातिपदिकसंज्ञा कथं वारणीया?

६. निपातस्यानर्थकस्य प्रातिपदिकसंज्ञा वक्तव्या - इति वार्तिकं कथं गतार्थम्?

७. आर्यिका आर्यका इति विषये शब्दरत्नकारस्य किं मतम्?

८. सरूपसूत्रे (विभक्तौ परतः एकशेषः इत्येवं) एकशेषस्य कतिभिः पक्षैः सम्भावना प्रदर्शिता? कः सिद्धान्तः?

९. अतो भिस ऐस् इत्यत्र एस् ग्रहणं किमर्थं न कृतम्?

१०. द्वन्द्वे च इति निषेधः किमवयवस्य उत समुदायस्य?

११. कंसं घातयतीत्यादौ कृल्लुकि तन्निमित्तकादेशनिवृत्तये क्रियमाणं वचनं किम्?

१२. आदर्शेन इत्यत्र णत्ववारणोपायः कः?

१३. रषाभ्यामित्यादिसूत्रे समानपदमित्यस्य परिष्कृतस्वरूपं किम्?

१४. ठस्येकः इत्यत्र स्थान्यादेशयोः अकारस्य विवक्षा अस्ति उत न?

१५. नित्यः परयणादेशः इति कारिकां पूरयत।

१६. ककुद्दोषणी इत्यत्र द्वन्द्वसमासे सति का आपत्तिः शब्दरत्नकारेण दर्शिता?

१७. संयोगान्तस्य लोपे इति कारिकां पूरयत।

१८. न विभक्तौ तुस्माः इत्यस्यानित्यत्वं कथम्?

१९. सीतायाः पतये नमः इत्यत्र पतिः समास एव इत्यस्य अप्रवृत्तिः कथम्?

२०. शब्दरत्नकारस्य आशयानुरोधं षड्भ्यः इति बहुवचनं किमर्थं कृतम्?

२१. तृज्वत्क्रोष्टुः इत्यादि त्रिसूत्र्या कः नियमः क्रियते?

२२. गोतो णित् इति सूत्रे गकारस्य उपलक्षणत्वे मनोरमाशब्दरत्नयोः उपात्तः प्रत्येकं हेतुः कः?

२३. रमा इत्यस्य स्वाद्युत्पत्तिः कथम्?

२४. नपुंसके अतिजरम् इति रूपे जरसभावे को हेतुः?

**II. चतुर्णां सङ्क्षिप्तोत्तराणि लिखत।** **४x५ = २०**

१. नुम्ग्रहणम् अनुस्वारोपलक्षणार्थमित्यादि विचारं स्पष्टयत।

२. न बहुव्रीहौ इति सूत्रे अकृतव्यूहपरिभाषया सम्बद्धं विचारं शब्दरत्नकाराशयवर्णनपूर्वकं व्याख्यात।

३. अल्लोपोनः इति सूत्रं सशब्दरत्नं सङ्गमयत।

४. प्रत्ययलोपे प्रत्ययलक्षणमिति सूत्रं सशब्दरत्नं व्याख्यात।

५. घिनदीसंज्ञयोः पक्षद्वयं स्पष्टयत।

६. सर्वनाम्नः असुङ् च इति न्यासं सशब्दरत्नं निरूपयत।

७. अतोमिति सूत्रं सशब्दरत्नं विवृणुत।

**III. द्वयोः प्रबन्धमारचयत।** **२x१० = २०**

१. अर्थवत्पदमुत्तरार्थम् - इति सशब्दरत्नम् आक्षेपसमाधानैः साधयत।

२. सुङस्योरकारेकारौ जशटङपाश्चेतः इति साधयतः।

३. नैकशेषः इति प्रतीकमारभ्य शब्दरत्नकारदिशा जननीवाचिपरिच्छेतृवाचिनोः मात्रोः एकशेषविषये विचारयत।
(नैकशेषः इति प्रतीकमारभ्य शब्दरत्नकारदिशा प्रातिपदिकैकशेषे मातृमात्रोः इत्यादि ग्रन्थं व्याख्यात)

४. उभशब्दस्य सर्वनामतायाः विचारं विषदयत।

५. दध्नः सेचौ दधिसेचौ इत्यत्र षत्ववारणोपायान् मनोरमाशब्दरत्नकारदिशा व्याखात।

**IV. प्रश्नमेकं समाधत्त।** **१x२० = २०**

१. ङ्याप्प्रातिपदिकादिति सूत्रे ङ्याप्ग्रहणप्रयोजनविचारं सशब्दरत्नं विवृणुत।

२. हल्ङ्यापः सोः इति सूत्रमस्तु इति यथाग्रन्थं सशब्दरत्नं साधयत।

# केन्द्रीयसंस्कृतविश्वविद्यालयः
(संसदः अधिनियमेन स्थापितः)
राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा A++ श्रेण्यां प्रत्यायितः

## अखिलभारतीय-शास्त्रप्रशिक्षणवर्गः

### सम्पूर्तिसत्रम्

श्रीक्रोधि/कालयुक्तनामसंवत्सरस्य ज्येष्ठमासस्य शुक्लपक्षे द्वादश्यां तिथौ बुधवासरे प्रातः ९:०० वादनतः
(दिनाङ्कः 19-06-2024, समयः - प्रातः 9:00 वादनात्)

**अध्यक्षः**
**आचार्यः श्रीनिवासः वरखेडी**
कुलपतिः
केन्द्रीयसंस्कृतविश्वविद्यालयः, देहली

**मुख्यातिथिः**
**आचार्यः के. ई. देवनाथन्**
कुलपतिचरः, कर्णाटकसंस्कृतविश्वविद्यालयः, बेङ्गलूरु

**विशिष्टातिथिः**
**आचार्यः ब्रजभूषणओझाः**
बनारसहिन्दूविश्वविद्यालयः, वाराणसी

**जयपुरपरिसरनिदेशकः**
**आचार्यः सुदेशकुमारशर्मा**

**राष्ट्रियसंयोजकः**
**आचार्यः कुलदीपशर्मा**

**कार्यक्रमेऽस्मिन् तत्रभवतां भवतां हार्दं स्वागतम्**

**आयोजनसमितिः**

आचार्यः नवीनहोल्ला (शृङ्गेरीपरिसरः)
आचार्यः विष्णुकान्तपाण्डेयः (जयपुरपरिसरः)
आचार्यः गणेश ईश्वरभट्टः (शृङ्गेरीपरिसरः)
आचार्यः सच्चिदानन्दस्नेही (देवप्रयागपरिसरः)
आचार्यः गणेश टि. पण्डितः (के.सं.वि., देहली)
डॉ. अमृता कौर (के.सं.वि., देहली)

कार्यक्रमं द्रष्टुं कृपया स्कैन कुर्वन्तु

https://meet.google.com/txo-frod-npi

**– :: स्थानम् ::–**
केन्द्रीयसंस्कृतविश्वविद्यालयः, जयपुरपरिसरः
श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः
श्रीराजीवगान्धिपरिसरः, शृङ्गेरी

# कार्यक्रमविवरणम्

दिनाङ्कः 19-06-2024 समयः - प्रातः 9:00 वादनात्



- वैदिकमङ्गलाचरणम्, दीपदीपनं सरस्वतीपूजनञ्च ।
- कुलगीतम्
- अतिथीनां स्वागतम्
- वाचिकं स्वागतम् - आचार्यः विष्णुकान्तपाण्डेयः
- प्रतिवेदनम् – आचार्यः कुलदीपशर्मा
- शास्त्रार्थोपस्थापनम् –
  - जयपुरपरिसरात् व्याकरणशास्त्रवर्गविद्यार्थिनः
  - श्रीरघुनाथकीर्तिपरिसरात् न्यायशास्त्रवर्गविद्यार्थिनः
  - श्रीराजीवगान्धीपरिसरात् अद्वैतवेदान्तवर्गविद्यार्थिनः
- अद्वैतवेदान्तवर्गस्य छात्राणां पक्षतः शिक्षणप्रदर्शनम् (PPT Presentation)
- वर्गस्य वृत्तचित्रप्रदर्शनम्, जयपुरपरिसरः

  अतिथीनाम् उद्बोधनम्
- मुख्यातिथिः – आचार्यः का. ई. देवनाथन्
- प्रतिवेदनविमोचनम् (अतिथिभिः)
- अनुभवकथनम् (परिसरत्रयात् एकैकः प्रशिक्षणार्थी)
- विशिष्टातिथिः – आचार्यः ब्रजभूषणओझाः
- प्रत्येकं शास्त्रवर्गस्य विजेतॄणां नामोद्घोषणा पुरस्कारराशिवितरणञ्च
- शलाकापरीक्षायां विजेतॄणां नामोद्घोषणा प्रमाणपत्रप्रदानञ्च
- अध्यक्षीयम् उद्बोधनम् - आचार्यः श्रीनिवासः वरखेडी
- प्रतिभागितायाः प्रमाणपत्रवितरणम् (परिसरनिदेशकेन अतिथिभिश्च) - डॉ.किरणखींची
- परिसरनिदेशकानां समुद्बोधनम् – प्रो. सुदेशकुमारशर्मा (जयपुरपरिसरः),

  प्रो. हंसधरझाः (शृङ्गेरीपरिसरः), प्रो.पि.वि.बि. सुब्रह्मण्यम् (देवप्रयागपरिसरः)
- धन्यवादज्ञापनम् – श्रीनरेशसिंहः
- राष्ट्रगानम्



सञ्चालकः

डॉ. कार्तिकभागवतः



